श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

## श्रीकूरनाथ श्रीवत्सचिह्नमिश्र अनुगृहीताः

# पञ्चस्तवाः

*This book* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

# विषयसूची


| | | |
|---|---|---|
| १ | वैकुण्ठस्तवः | ५ |
| २ | अतिमानुषस्तवः | २३ |
| ३ | सुन्दरबाहुस्तवः | ३३ |
| ४ | वरदराजस्तवः | ५३ |
| ५ | श्रीस्तवः | ६९ |

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवैकुण्ठस्तवः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळ सूत्रताम्॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये॥ १॥

त्रैविद्यवृद्धजनमूर्धविभूषणं यत्
सम्पच्च सात्त्विकजनस्य यदेव नित्यम्।
यद्वा शरण्यं अशरण्यजनस्य पुण्यं
तत् संश्रयेम वकुळाभरणाङ्घ्रियुग्मम्॥ २॥

भक्तिप्रभावभवदद्भुतभावबन्ध-
सन्धुक्षितप्रणयसाररसौघपूर्णः।
वेदार्थरत्ननिधिरच्युतदिव्यधाम
जीयात् पराङ्कुशपयोधिरसीमभूमा॥ ३॥

यन्मङ्गळाय महते जगतामुशन्ति
त्रैविष्टपान्यपि पदानि यदाश्रयाणि।
वन्दामहे सरसिजेक्षणमद्वितीयं
वेदान्तवेद्यं अनिदम्प्रथमं महस्तत्॥ ४॥

पीताम्बरं वरदशीतलदृष्टिपातं
आजानुलम्बिभुजं आयतकर्णपाशम्।
तन्मेघमेचकं उदग्रविशालवक्षः
लक्ष्मीधरं किमपि वस्तु ममाविरस्तु॥ ५॥

यत् तत्त्वमक्षरमदृश्यमगोत्रवर्णं
अग्राह्यमव्ययमनीदृशं अद्वितीयम्।
ईशानमस्य जगतो यदणोरणीयः
तद् वैष्णवं पदमुदारमुदाहरामः॥ ६ ॥

आम्नायमूर्धनि च मूर्धनि चोर्ध्वपुंसां
यद् धाम वैष्णवमभीक्ष्णतरं चकास्ति।
तन्मादृशामपि च गोचरमेति वाचो
मन्ये तदीयमिदमाश्रितवत्सलत्वम्॥ ७ ॥

जानन्नपीह किल मामनपत्रपिष्णुः
विष्णोः पदप्रणयिनीं गिरमाद्रियेऽहम्।
न श्वावलीढमपि तीर्थमतीर्थमाहुः
नोदन्यताऽपि च शुना किल लज्जितव्यं ॥ ८ ॥

देवस्य दैत्यमथनस्य गुणेष्वियत्ता
सङ्ख्या च वाङ्मनसगोचरमत्यभूताम्।
अप्येवं अण्वपि च तत्र ममार्तिशान्त्यै
कीटस्य तृष्यत उदन्वति विप्रुषाऽलम्॥ ९ ॥

प्रेमार्द्रविह्वलगिरः पुरुषाः पुराणाः
त्वां तुष्टुवुर्मधुरिपो! मधुरैर्वचोभिः।
वाचो विडम्बितमिदं मम नीचवाचः
क्षान्तिस्तु ते सविषया मम दुर्वचोभिः॥ १० ॥

आज्ञा तवात्रभवती विदिता त्रयी सा
तां हि प्रमाणमुपजग्मुरतीन्द्रियेऽर्थे।
आभासभूयमभियान्त्यपराणि दोषैः
एषा तु दोषरहिता महिता पुराणी॥ ११ ॥

अन्तर्हितो निधिरसि त्वमशेषपुंसां
लभ्योऽसि पुण्यपुरुषैः इतरैर्दुरापः।

तत्र त्रयीं सुकृतिनः कृतिनोऽधिजग्मुः
बाह्येषु बाह्यचरितैरितरैर्निपेते॥ १२॥

चित्रं विधेर्विलसितं त्विदमाविरस्ति
दुष्टात्मनामयमहो! किल दुर्विपाकः।
यत् केचिदत्रभवतीं श्रुतिमाश्रयन्तोऽपि
अर्थे कुदृष्टिविनिविष्टधियो विनष्टाः॥ १३॥

बाह्याः कुदृष्टय इति द्वितयेऽप्यपारं
घोरं तमः समुपयन्ति नहीक्षसे तान्।
जग्धस्य काननमृगैर्मृगतृष्णिकेप्सोः
कासारसत्त्वनिहतस्य च को विशेषः॥ १४॥

न्यायस्मृतिप्रभृतिभिर्भवता निसृष्टैः
वेदोपबृंहणविधावुचितैरुपायैः।
श्रुत्यर्थमर्थमिव भानुकरैर्विभेजुः
त्वद्भक्तिभावितविकल्मषशेमुषीकाः॥ १५॥

ये तु त्वदङ्घ्रिसरसीरुहभक्तिहीनाः
तेषाममीभिरपि नैव यथार्थबोधः।
पित्तघ्नमञ्जनमनापुषि जातु नेत्रे
नैव प्रभाभिरपि शङ्खसितत्वबुद्धिः॥ १६॥

तत्त्वार्थतत्परपरश्शतवेदवाक्यैः
सामर्थ्यतः स्मृतिभिरप्यथ तादृशीभिः।
त्वामेव तत्त्वपरसात्त्विकसत्पुराणैः
दैवज्ञधीभिरपि निश्चिनुमः परेशम्॥ १७॥

अन्यत्र तु क्वचन केचिदिहेशशब्दात्
लोकप्रसिद्धिमुपगम्य तमीशमाहुः।
तैश्च प्रसिद्धिविभवस्य समूलतायै
ग्राह्या त्रयी त्वयि तु साऽच्युत! सम्मुखीना॥ १८॥

यः खल्वणोरणुतरो महतो महीयान्
आत्मा जनस्य जनको जगतश्च योऽभूत्।
वेदात्मकप्रणवकारणवर्णवाच्यं
तं त्वां वयं तु परमेश्वरमामनामः॥ १९ ॥

आत्मेश्वरोऽसि न परोऽस्ति तवेश्वरोऽन्यः
विश्वस्य चाधिपतिरस्य परायणं च।
नारायणाच्युत! परस्त्वमिहैक एव
ब्रह्मादयोऽपि भवदीक्षणलब्धसत्ताः॥ २० ॥

नित्यः समाभ्यधिकवर्जित ऊर्जितश्रीः
नित्येऽक्षरे दिवि वसन् पुरुषः पुराणः।
सत्त्वप्रवर्तनकरो जगतोऽस्य मूलं
नान्यस्त्वदस्ति धरणीधर! वेदवेद्यः॥ २१ ॥

यं भूतभव्यभवदीशमनीशमाहुः
अन्तस्समुद्रनिलयं यमनन्तरूपम्।
यस्य त्रिलोकजननी महिषी च लक्ष्मीः
साक्षात् स एव पुरुषोऽसि सहस्रमूर्धा॥ २२ ॥

सर्वश्रुतिष्वनुगतं स्थिरमप्रकम्प्यं
नारायणाह्वयधरं त्वमिवानवद्यम्।
सूक्तं तु पौरुषमशेषजगत्पवित्रं
त्वामुत्तमं पुरुषमीशमुदाजहार॥ २३ ॥

आनन्दमैश्वरं अवाङ्मनसावगाह्यं
आम्नासिषुः शतगुणोत्तरितक्रमेण।
सोऽयं तवैव नृषु हि त्वमिहान्तरात्मा
त्वं पुण्डरीकनयनः पुरुषश्च पौष्णः॥ २४ ॥

यन्मूलकारणमबुध्यत सृष्टिवाक्यैः
ब्रह्मेति वा सदिति वाऽऽत्मगिराऽथवा तत्।

नारायणस्त्विति महोपनिषद् ब्रवीति
सौबालिकीप्रभृतयोऽप्यनुजग्मुरेनाम्॥ २५ ॥

ज्योतिः परं परमतत्त्वं अथो परात्मा
ब्रह्मेति च श्रुतिषु यत् परवस्त्वधीतम्।
नारायणस्तदिति तद् विशिनष्टि काचिद्
विष्णोः पदं परमं इत्यपरा गृणाति॥ २६ ॥

सन्तीदृशः श्रुतिशिरस्सु परस्सहस्राः
वाचस्तव प्रथयितुं परमेशितृत्वम्।
किञ्चेह न व्यजगणः क्रिमिधातृभेदं
क्रामन् जगन्ति निगिरन् पुनरुद्गिरंश्च॥ २७ ॥

रूपश्रिया परमया परमेण धाम्ना
चित्रैश्च कैश्चिदुचितैर्भवतश्चरित्रैः।
चिह्नैरनिह्नवपरैरपरैश्च कैश्चिद्
निश्चिन्वते त्वयि विपश्चित ईशितृत्वम्॥ २८ ॥

यस्याः कटाक्षणमनुक्षणमीश्वराणां
ऐश्वर्यहेतुरिति सर्वजनीनमेतत्।
तां श्रीरिति त्वदुपसंश्रयणान्निराहुः
त्वां हि श्रियः श्रियमुदाहुरुदारवाचः॥ २९ ॥

माया त्वया गुणमयी किल या निसृष्टा
सा ते विभो! किमिव नर्म न निर्मिमीते।
कौतस्कुताः स्थिरकुतर्कवशेन केचित्
सत्यां श्रुतौ च बधिरास्त्वयि तन्महिम्ना॥ ३० ॥

यः स्थावरक्रिमिपतङ्गमतङ्गजादिषु
अन्येषु जन्तुषु सदैव विजायमानः।
त्वं नित्यनिर्मल निरञ्जन निर्विकार-
कल्याणसद्गुणनिधे! स इतीरितस्तैः॥ ३१ ॥

त्वद्दृष्टिजुष्टमिदमाविरभूदशेषं
नो चेत् कटाक्षयसि नैव भवेत् प्रवृत्तिः।
स्थातुं च वाञ्छति जगत् तव दृष्टिपातं
तेन श्रुतौ जगदिषे हि जगत् त्वमेव॥ ३२॥

एवं भगो! इह भवत्परतन्त्र एव
शब्दोऽपि रूपवदमुष्य चराचरस्य।
ऐश्वर्यमीदृशमिदं श्रुतिषूदितं ते
पापीयसां अयमहो! त्वयि मोहहेतुः॥ ३३॥

ये त्वत्कटाक्षलवलक्ष्यमिव क्षणं तैः
ऐश्वर्यमीदृशं अलभ्यमलम्भि पुम्भिः।
यत् केऽपि सञ्जगरिरे परमेशितृत्वं
तेषामपि श्रुतिषु तन्महिमप्रसङ्गात्॥ ३४॥

नित्येषु वस्तुषु भवन्निरपेक्षमेव
तत्तत्स्वरूपं इति केचिदिह भ्रमन्तः।
ऐश्वर्यमत्र तव सावधि सङ्गिरन्ते
ब्रूते त्रयी तु निरुपाधिकमीशनं ते॥ ३५॥

इच्छात एव तव विश्वपदार्थसत्ता
नित्यं प्रयास्तव तु केचन ते हि नित्याः।
नित्यं त्वदेकपरतन्त्रनिजस्वरूपाः
भावत्कमङ्गळगुणा हि निदर्शनं नः॥ ३६॥

विश्वस्य विश्वविधकारणमच्युत! त्वं
कार्यं तदेतदखिलं चिदचित्स्वरूपम्।
त्वं निर्विकार इति वेदशिरस्सु घोषो
निस्सीममेव तव दर्शयतीशितृत्वम्॥ ३७॥

किंसाधनः क्व निवसन् किमुपाददानः
कस्मै फलाय सृजतीश इदं समस्तम्।

इत्याद्यनिष्ठितकुतर्कमतर्कयन्तः
त्वद् वैभवं श्रुतिविदो विदुरप्रतर्क्यम्॥ ३८॥

यत् संवृतं दशगुणोत्तरसप्ततत्त्वैः
अण्डं चतुर्दशजगद् भवधातृधाम।
अण्डानि तत्सुसदृशानि परश्शतानि
क्रीडाविधेस्तव परिच्छदतामगच्छन्॥ ३९॥

इच्छाविहारविधये विहितान्यमूनि
स्यात् त्वद्विभूतिलवलेशकलायुतांशः।
या वै न जातु परिणामपदास्पदं सा
कालातिगा तव परा महती विभूतिः॥ ४०॥

यद् वैष्णवं हि परमं पदमामनन्ति
खं वा यदेव परमं तमसः परस्तात्।
तेजोमयं परमसत्त्वमयं ध्रुवं यद्
आनन्दकन्दं अतिसुन्दरं अद्भुतं यत्॥ ४१॥

यद् ब्रह्मरुद्रपुरुहूतमुखैर्दुरापं
नित्यं निवृत्तिनिरतैः सनकादिभिर्वा।
सायुज्यमुज्ज्वलमुशन्ति यदापरोक्ष्यं
यस्मात् परं न पदमञ्चितमस्ति किञ्चित्॥ ४२॥

रूपेण सद्गुणगणैः परया समृद्ध्या
भावैरुदारमधुरैरपि वा महिम्ना।
तादृक् तद् ईदृगिदं इत्युपवर्णयन्त्यो
वाचो यदीयविभवस्य तिरस्क्रियायै॥ ४३॥

यद् वृद्ध्यपक्षयविनाशमुखैर्विकारैः
एतैरसंस्तुतं अनस्तमितास्तिशब्दम्।
यद्गौरवात् श्रुतिषु फल्गु फलं क्रियाणां
आदिष्टमन्यदसुखोत्तरमध्रुवं च॥ ४४॥

निष्कल्मषैर्निहतजन्मजराविकारैः
भूयिष्ठभक्तिविभवैरभवैरवाप्यम्।
अन्यैरधन्यपुरुषैर्मनसाऽप्यनाप्यं
वैकुण्ठनाम तव धाम तदामनन्ति॥ ४५ ॥

नित्या तवान्यनिरपेक्षमहामहिम्नोऽपि
एतादृशी निरवधिर्नियता विभूतिः।
ज्ञानादयो गुणगणाः समतीरसीमाः
लक्ष्मीः प्रिया परिजनाः पतगेन्द्रमुख्याः॥ ४६ ॥

एकस्य येषु हि गुणस्य लवायुतांशः
स्यात् कस्यचित् स खलु वाङ्मनसातिगश्रीः।
ये तादृशोऽत्यवधयः समतीतसङ्ख्याः
त्वत्सद्गुणास्त्वमसि तन्निरपेक्षलक्ष्मीः॥ ४७ ॥

सर्वस्य चैव गुणतो हि विलक्षणत्वं
ऐश्वर्यतश्च किल कश्चिदुदञ्चितः स्यात्।
तत् प्रत्युत त्वयि विभो! विभवो गुणाश्च
सम्बन्धतस्तव भजन्ति हि मङ्गळत्वम्॥ ४८ ॥

दूरे गुणास्तव तु सत्त्वरजस्तमांसि
तेन त्रयी प्रथयति त्वयि निर्गुणत्वम्।
नित्यं हरे! निखिलसद्गुणसागरं हि
त्वामामनन्ति परमेश्वरमीश्वराणाम्॥ ४९ ॥

ज्ञानात्मनस्तव तदेव गुणं गृणन्ति
तेजोमयस्य हि मणेर्गुण एव तेजः।
तेनैव विश्वमपरोक्षमुदीक्षसे त्वं
रक्षा त्वदीक्षणत एव यतोऽखिलस्य॥ ५० ॥

त्रय्युद्गता तव युवत्वमुखैर्गुणौघैः
आनन्दमेधितं इयानिति सन्नियन्तुम्।

ते ये शतं त्विति परम्परया प्रवृत्ता
नैवेष वाङ्मनसगोचर इत्युदाह॥ ५१॥

एवं तया चतुरया तव यौवनाद्याः
सर्वे गुणाः सह समस्तविभूतिभिश्च।
प्रव्याहृताः स्युरवधीन् अवधीरयन्तो
वाचामगोचरमहामहिमान एव॥ ५२॥

संवर्तवर्ति निखिलं निरभिज्ञमज्ञं
चित्रे च कर्मणि यथार्हमहो! नियच्छन्।
सद्यः क्रिमिद्रुहिणभेदं अभेदमेतद्
आविश्चकर्थ सकृदीक्षणदीक्षणेन॥ ५३॥

अस्तं यदुद्यद् उपचाय्यपचायि चैवं
ईशं दरिद्रमथ जङ्गममप्यनिङ्गम्।
विश्वं विचित्रं अविलक्षणवीक्षणेन
विक्षोभयस्यनवधिर्बत शक्तिरैशी॥ ५४॥

रूपप्रकारपरिणामकृतव्यवस्थं
विश्वं विपर्यसितुमन्यदसच्च कर्तुम्।
क्षाम्यन् स्वभावनियमं किमुदीक्षसे त्वं
स्वातन्त्र्यमैश्वरं अपर्यनुयोज्यमाहुः॥ ५५॥

संवर्तसम्भृतकरस्य सहस्ररश्मेः
उस्रं तमिस्रयदजस्रविहारि हारि।
नित्यानुकूलमनुकूलनृणां परेषां
उद्वेजनं च तव तेज उदाहरन्ति॥ ५६॥

नैव ह्यवाप्यमनवाप्तमिहास्ति यस्य
सत्ताऽपि तस्य तव वीक्षणतः प्रजानाम्।
सम्पत् तु किंपुनरितो न वदान्यमन्यं
मन्ये त्वमेव खलु मन्दिरमिन्दिरायाः॥ ५७॥

पापैरनादिभवसम्भववासनोत्थैः
दुःखेषु यः खलु मिमङ्क्षति हन्त! जन्तुः।
तं केवलं नु कृपयैव समुद्धरिष्यन्
तद्दुष्कृतस्य ननु निष्कृतिमात्थ शास्त्रैः॥ ५८॥

शास्त्रैरनादिनिधनैः स्मृतिभिस्त्वदीय-
दिव्यावतारचरितैः शुभया च दृष्ट्या।
निःश्रेयसं यदुपकल्पयसि प्रजानां
सा त्वत्कृपाजलधितल्लजवल्गितश्रीः॥ ५९॥

हे हन्त! जन्तुषु निरन्तरसन्ततात्मा
पाप्मा हि नाम वद कोऽयमचिन्त्यशक्तिः।
यस्त्वत्कृपाजलधिमप्यतिवेलखेलं
उल्लङ्घयत्यकृतभासुर भागधेयान्॥ ६०॥

यद् ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं
तत् किल्बिषं सृजति जन्तुरिह क्षणार्धे।
एवं सदा सकलजन्मसु सापराधं
क्षाम्यस्यहो! तदभिसन्धिविराममात्रात्॥ ६१॥

क्षान्तिस्तवेयं इयती महती कथं नु
मुह्येदहो! त्वयि कृताञ्जलिपञ्जरेषु।
इत्थं स्वतो निखिलजन्तुषु निर्विशेषं
वात्सल्यमुत्सुकजनेषु कथं गुणस्ते॥ ६२॥

विश्वं धियैव विरचय्य निचाय्य भूयः
सञ्जहरुषः सति समाश्रितवत्सलत्वे।
आजग्मुषस्तव गजोत्तमबृंहितेन
पादं परामममृशुषोऽपि च का मनीषा॥ ६३॥

यः कश्चिदेव यदि किञ्चन हन्त! जन्तुः
भव्यो भजेत भगवन्तमनन्यचेताः।

तं सोऽयं ईदृश इयानिति वाऽप्यजानन्
हे ! वैनतेयसममप्युररीकरोषि॥ ६४॥

त्वत्साम्यमेव भजतामभिवाञ्छसि त्वं
तत्सात्कृतैर्विभवरूपगुणैस्त्वदीयैः।
मुक्तिं ततो हि परमं तव साम्यमाहुः
त्वद्दास्यमेव विदुषां परमं मतं तत्॥ ६५॥

तद्वै तथाऽस्तु कतमोऽयमहो ! स्वभावः
यावान् यथाविधगुणो भजते भवन्तम्।
तावान् तथाविधगुणस्तदधीनवृत्तिः
संश्लिष्यसि त्वमिह तेन समानधर्मा॥ ६६॥

नीलाञ्जनाद्रिनिभं उन्नसमायताक्षं
आजानुजैत्रभुजं आयतकर्णपाशम्।
श्रीवत्सलक्षणं उदारगभीरनाभिं
पश्येम देव ! शरदः शतमीदृशं त्वाम्॥ ६७॥

अम्भोरुहाक्षं अरविन्दनिभाङ्घ्रियुग्मं
आताम्रतामरसरम्यकराग्रकान्ति।
भृङ्गालकं भ्रमरविभ्रमकायकान्ति
पीताम्बरं वपुरदस्तु वयं स्तवाम॥ ६८॥

भ्रूविभ्रमेण मृदुशीतविलोकितेन
मन्दस्मितेन मधुराक्षरया च वाचा।
प्रेमप्रकर्षपिशुनेन विकासिना च
सम्भावयिष्यसि कदा मुखपङ्कजेन॥ ६९॥

वज्राङ्कुशध्वजसरोरुहशङ्खचक्र-
मत्सीसुधाकलशकल्पककल्पिताङ्कम्।
त्वत्पादपद्मयुगळं विगळत्प्रभाद्भिः
भूयोऽभिषेक्ष्यति कदा नु शिरो मदीयम्॥ ७०॥

त्रैविक्रमक्रमकृताक्रमणत्रिलोकं
उत्तंसमुत्तमं अनुत्तमभक्तिभाजाम्।
नित्यं धनं मम कदा हि मदुत्तमाङ्गं
अङ्गीकरिष्यति चिरं तव पादपद्मम्॥ ७१॥

उन्निद्रपत्रशतपत्रसगोत्रं अन्त-
र्लेखारविन्दं अभिनन्दनमिन्द्रियाणाम्।
मन्मूर्ध्नि हन्त! करपल्लवतल्लजं ते
कुर्वन् कदा कृतमनोरथयिष्यसे माम्॥ ७२॥

आङ्गी निसर्गनियता त्वयि हन्त कान्तिः
नित्यं तवालमियमेव तथाऽपि चान्या।
वैभूषणी भवति कान्तिरलंतरां सा
हे पुष्कलैव निखिलाऽपि भवद्विभूतिः॥ ७३॥

श्रीवत्सकौस्तुभकिरीटललाटिकाभिः
केयूरहारकटकोत्तमकण्ठिकाभिः
उद्दामदाममणिनूपुरनीविबन्धैः
भान्तं भवन्तं अनिमेषं उदीक्षिषीय॥ ७४॥

ऐन्दीवरी क्वचिदपि क्वचनारविन्दी
चान्द्रातपी क्वचन च, क्वचनाथ हैमी।
कान्तिस्तवोढपरभागपरस्परश्रीः
पार्येत पारणयितुं किमु चक्षुषोर्मे॥ ७५॥

त्वां सेवितं जलजचक्रगददासिशार्ङ्गैः
तार्क्ष्येण सैन्यपतिनाऽनुचरैस्तथाऽन्यैः।
देव्या श्रिया सह वसन्तमनन्तभोगे
भुञ्जीय साञ्जलिरसङ्कुचिताक्षिपक्ष्मा॥ ७६॥

कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः
नित्यैरनुक्षणनवीनरसार्द्रभावैः।

नित्याभिवाञ्छितपरस्परनीचभावैः
मद्दैवतैः परिजनैस्तव सङ्गसीय॥ ७७ ॥

यत् किञ्चिदुज्ज्वलमिदं यदुपाख्ययाऽऽहुः
सौन्दर्यमृद्धिरिति यन्महिमांशलेशः।
नाम्नैव यां श्रियमुशन्ति यदीयधाम
त्वामामनन्ति यतमा यतमानसिद्धिः॥ ७८ ॥

या वै त्वयाऽप्युदधिमन्थनयत्नलभ्या
याऽन्तर्हिते जगदुन्मथनोद्यतोऽभूः।
या च प्रतिक्षणमपूर्वरसानुबन्धैः
भावैर्भवन्तमभिनन्दयते सदैव॥ ७९ ॥

रूपश्रिया गुणगणैर्विभवेन धाम्ना
भावैरुदारमधुरैश्चतुरैश्चरित्रैः।
नित्यं तवैव सदृशीं श्रियमीश्वरीं तां
त्वां चाञ्चितः परिचरेयमुदीर्णभावः॥ ८० ॥

या बिभ्रती स्थिरचरात्मकमेव विश्वं
विश्वम्भरा परमया क्षमया क्षमा च।
तां मातरं च पितरं च भवन्तमस्य
व्युच्छन्तु रात्रय इमा वरिवस्यतो मे॥ ८१ ॥

भावैरुदारमधुरैर्विविधैर्विलासैः
भ्रूविभ्रमस्मितकटाक्षनिरीक्षणैश्च।
या त्वन्मयी त्वमपि यन्मय एव सा मां
नीला नितान्तमुररीकुरुतामुदारा॥ ८२ ॥

भावैरनुक्षणं अपूर्वरसानुविद्धैः
अत्यद्भुतैरभिनवैरभिनन्द्य देवीः।
भृत्यान् यथोचितपरिच्छदिनो यथार्हं
सम्भावयन्तमभितो भगवन्! भवेयम्॥ ८३ ॥

हा हन्त हन्त! हतकोऽस्मि खलोऽस्मि धिङ्मां
मुह्यन् अहो! अहमिदं किमुवाच वाचा।
त्वामङ्ग! मङ्गळगुणास्पदमस्तहेयं
आः! स्मर्तुमेव कथमर्हति मादृगंहः॥ ८४ ॥

अंहः प्रसह्य विनिगृह्य विशोध्य बुद्धिं
व्यापूय विश्वमशिवं जनुषाऽनुबद्धम्।
आधाय सद्गुणगणानपि नाहमर्हः
त्वत्पादयोर्यदहमत्र चिरान्निमग्नः॥ ८५ ॥

जानेऽथवा किमहमङ्ग! यदेव सङ्गाद्
अङ्गीकरोषि न हि मङ्गळमन्यदस्मात्।
तेन त्वमेनमुररीकुरुषे जनं चेद्
नैवामुतो भवति युक्ततमो हि कश्चित्॥ ८६ ॥

यन्नाभवाम भवदीयकटाक्षलक्षं
संसारगर्तपरिवर्तं अतोऽगमाम।
आगांसि ये खलु सहस्रमजस्रमेव
जन्मस्वतन्महि कथं त इमेऽनुकम्प्याः॥ ८७ ॥

सत्कर्म नैव किल किञ्चन सञ्चिनोमि
विद्याऽप्यवद्यरहिता न च विद्यते मे।
किञ्च त्वदञ्चितपदाम्बुजभक्तिहीनः
पात्रं भवामि भगवन्! भवतो दयायाः॥ ८८ ॥

किं भूयसा प्रलपितेन यदेव किञ्चित्
पापाह्वं अल्पमुरु वा तदशेषमेषः।
जानन् न वा शतसहस्रपरार्धकृत्वो
योऽकार्षं एनं अगतिं कृपया क्षमस्व॥ ८९ ॥

देव! त्वदीयचरणप्रणयप्रवीण-
रामानुजार्यविषयीकृतं अप्यहो! माम्।

भूयः प्रधर्षयति वैषयिको विमोहो
मत्कर्मणः कतरदत्र समानसारम्॥ १०॥

गर्भेषु निर्भरनिपीडनखिन्नदेहः
क्षोदीयसोऽतिमहतोऽप्यखिलस्य जन्तोः।
जन्मान्तराण्यनुविचिन्त्य परस्सहस्राणि
अत्राहं अप्रतिविधिर्निहतश्चरामि॥ ११॥

भूयश्च जन्मसमयेषु सुदुर्वचानि
दुःखानि दुःखमतिरिच्य किमप्यजानन्।
मूढोऽनुभूय पुनरेव तु बालभावात्
दुःखोत्तरं निजचरित्रममुत्र सेवे॥ १२॥

भूयांसि भूय उपयन् विविधानि दुःखानि
अन्यच्च दुःखमनुभूय सुखभ्रमेण।
दुःखानुबन्धमपि दुःखविमिश्रमल्पं
क्षुद्रं जुगुप्सितसुखं सुखमित्युपासे॥ १३॥

लोलद्भिरिन्द्रियहयैरपथेषु नीतः
दुष्प्रापदुर्भगमनोरथमथ्यमानः।
विद्याधनाभिजनजन्ममदेन काम-
क्रोधादिभिश्च हतधीर्न शमं प्रयामि॥ १४॥

लभ्येषु दुर्लभतरेष्वपि वाञ्छितेषु
जाता सहस्रगुणतः प्रतिलम्भनेऽपि।
विघ्नैर्हतेष्वपि च तेषु समूलघातं
वर्धिष्णुरेव न तु शाम्यति हन्त तृष्णा॥ १५॥

त्वत्कीर्तनस्तुतिनमस्कृतिवेदनेषु
श्रद्धा न भक्तिरपि शक्तिरथो न चेच्छा।
नैवानुतापमतिरेष्वकृतेषु किं नु
भूयान् अहो! परिकरः प्रतिकूलपक्षे॥ १६॥

एतेन वै सुविदितं बत मामकीनं
दौरात्म्यं अप्रतिविधेयमपारं ईशः !।
संमूर्च्छतोऽप्यपदमस्मि यतस्त्वदीय-
निस्सीमभूमकरुणामृतवीचिवायोः॥ ९७ ॥

ऐश्वर्यवीर्यकरुणागरिमक्षमाद्याः
स्वामिन्! अकारणसुहृत्त्वं अथो विशेषात्।
सर्वे गुणाः सविषयास्तव मां अपार-
घोराघपूर्णं अगतिं निहतं समेत्य॥ ९८ ॥

त्वत्पादसंश्रयणहेतुषु साधिकारान्
उद्युञ्जतश्चरितकृत्स्नविधींश्च तांस्तान्।
त्वं रक्षसीति महिमा न तवालमेष
मां चेदनीदृशमनन्यगतिं न रक्षेः॥ ९९ ॥

या कर्मणामधिकृतिर्य इहोद्यमस्तेषु
अप्येष्वनुष्ठितिरशेषमिदं हि पुंसाम्।
त्वामन्तरेण न कथञ्चन शक्यमाप्तुं
एवं च तेषु मयि चास्ति न ते विशेषः॥ १०० ॥

निर्बन्ध एष यदि ते यदशेषवैध-
संसेविनो वरद! रक्षसि नेतरान्स्त्वम्।
तर्हि त्वमेव मयि शक्त्यधिकारवाञ्छाः
प्रत्यूहशान्तिमितरच्च विधेहि विश्वाम्॥ १०१ ॥

॥ इति श्रीवैकुण्ठस्तवः समाप्तः ॥

व्यक्तीकुर्वन् निगमशिरसामर्थमन्तर्निगूढं
श्रीवैकुण्ठस्तवमकृत यः श्रेयसे सज्जनानाम्।
कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे
श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगताः देशिका मुक्तिमापुः।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थाम्
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः॥

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री अतिमानुषस्तवः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळ सूत्रताम्॥

अतिमानुषशीलवृत्तवेषैः अतिवृत्तामरविक्रमप्रतापैः।
अतिलङ्घितसर्वलोकसाम्यं वरये वैष्णववैभवावतारम्॥ १ ॥

श्रेयः किरन्तु किरणाश्चरणारविन्द-
निष्यन्दमानमकरन्दरसौघदेश्याः।
तज्ज्ञाः श्रुतेर्मधुन उत्स इति प्रतीताः
मङ्गळ्यरङ्गनिलयस्य परस्य धाम्नः॥ २ ॥

श्रीमत्पराङ्कुशमुनीन्द्रमनोनिवासात्
तज्ज्ञानुरागरसमज्जनं अञ्जसाऽऽप्य।
अद्याप्यनारततदुत्थितरागयोगं
श्रीरङ्गराजचरणाम्बुजं उन्नयामः॥ ३ ॥

वज्रध्वजाङ्कुशसुधाकलशातपत्र-
पङ्केरुहाङ्कपरिकर्मपरीतमन्तः।
आपादपङ्कजविशृङ्खलदीप्रमौलेः
श्रीरङ्गिणश्चरणयोर्युगं आश्रयामः॥ ४ ॥

श्रीरङ्गराजचरणौ प्रणुमो ययोः खलु
एकस्त्रिविक्रमविधौ वसुधामशेषाम्।
व्यक्रंस्त साचलकुलामपि विप्रकीर्ण-
स्थूलावलग्नसिकतामिव निर्नतोच्चम्॥ ५ ॥

ज्ञानं बलं विपुलमीशनवीर्यशक्ति-
तेजांसि च त्रियुगभूयमुपागतानि।

पूर्णानि षट् च परिगृह्य भवंश्चतुर्धा
भक्तं जनं त्वमनुजग्रहिथानुरागात्॥ ६ ॥

एकान्तमङ्गळगुणास्पदं अस्तहेयं
नित्यं पदं तव यतस्तत एव देव।
आम्नायते तदिह विश्वविरूपरूपं
तेनैव नन्विदं अशब्दं अरूपं आहुः॥ ७ ॥

शब्दादि हेयं इह गोचर इन्द्रियाणां
तत्प्रत्यनीकविभवस्त्वं अतीन्द्रियोऽसि।
तेनैव ते न बत दर्शनमस्ति किञ्चिद्
वाचो धियश्च तत एव न गोचरोऽसि॥ ८ ॥

एवं स्थिते त्वदुपसंश्रयणाभ्युपायो
मानेन केनचिदलप्स्यत नोपलब्धम्।
नो चेद् अमर्त्यमनुजादिषु योनिषु त्वं
इच्छाविहारविधिना समवातरिष्यः॥ ९ ॥

शीलः क एष तव हन्त! दयैकसिन्धो!
क्षुद्रे पृथग्जनपदे जगदण्डमध्ये।
क्षोदीयसोऽपि हि जनस्य कृते कृती त्वं
अत्रावतीर्य ननु लोचनगोचरोऽभूः॥ १० ॥

यं पातकात् सुमहतोऽप्युदधारयस्त्वं
त्वत्पादवारिपरिपूतशिराश्च योऽभूत्।
तं वन्दसे किल ततश्च वरं वृणीषे!
क्रीडाविधिर्बत विलक्षणलक्षणस्ते॥ ११ ॥

क्रीडाविधेः परिकरस्तव या तु माया
सा मोहिनी न कतमस्य तु हन्त जन्तोः।
है! मर्त्यसिंहवपुषस्तव तेजसोंऽशे
शम्भुर्भवन् हि शरभः शलभो बभूव॥ १२ ॥

यस्यात्मतां त्रिपुरभङ्गविधावधास्त्वं
त्वच्छक्तितेजितशरो विजयी च योऽभूत्।
दक्षक्रतौ तु किल तेन विनिर्जितस्त्वं
युक्तो विधेयविषयेषु हि कामचारः॥ १३॥

मुग्धः शिशुः वटदले शयितोऽतितन्वा
तन्वा जगन्ति बिभृषे सविकासमेव।
ऐशीमिमां तु तव शक्तिमतर्कितव्यां
अव्याजतः प्रथयसे किमिहावतीर्णः॥ १४॥

ब्रह्मेशमध्यगणना गणनाऽर्कपङ्क्तौ
इन्द्रानुजत्वं अदितेस्तनयत्वयोगात्।
इक्ष्वाकुवंश यदुवंशजनिश्च हन्त!
श्लाघ्यान्यमून्यनुपमस्य परस्य धाम्नाः॥ १५॥

त्वन्निर्मिता जठरगा च तव त्रिलोकी
किं भिक्षणादियमृते भवता दुरापा।
मध्ये कदा तु न विचक्रमिषे जगच्चेत्
त्वद्विक्रमैः कथमिव श्रुतिरञ्चिता स्यात्॥ १६॥

एतत् कथं कथय यन्मथितस्त्वयाऽसौ
हित्वा स्वभावनियमं प्रथितं त्रिलोक्याम्।
अश्वाप्सरोविषसुधाविधुपारिजात
लक्ष्म्यात्मना परिणतो जलधिर्बभूव॥ १७॥

पृच्छामि किञ्चन यदा किल राघवत्वे
मायामृगस्य वशगो मनुजत्वमौग्ध्यात्।
सीतावियोगविवशो न च तद्गतिज्ञः
प्रादास्तदा परगतिं हि कथं खगाय॥ १८॥

अक्षुण्णयोगपथं अग्र्यहतं जटायुं
तिर्यञ्चमेव बत मोक्षपथे नियोक्तुम्।

शक्नोषि वेत्सि च यदा स तदा कथं त्वं
देवीमवाप्तुमनलं व्यथितो विचिन्वन्॥ १९ ॥

सालान् हि सप्त सगिरीन् सरसातलान् यान्
एकेषुमन्दजवतो निरपत्रयस्त्वम्।
तेष्वेकविव्यथनखिन्नकपिप्रणुन्नं
शाखामृगं मृगयसे स्म कथं सहायम्॥ २० ॥

दासः सखा समभवत् तव यः कपीन्द्रः
तद्विद्विषं कपिं अमर्षवशात् जिघांसुः।
त्वत्स्नेहविक्लवधियं तमिमं कपीन्द्रं
विस्रम्भयन् सपदि सालगिरीन् अविध्यः॥ २१ ॥

यद्वा मृगं मृगयुवद् मृगयापदेशात्
छन्नो जघन्थ न तु शत्रुवदाभिमुख्यात्।
तद् युक्तमेव तव राघववंशजस्य
तिर्यक्षु नैव हि विपक्षतयोपचारः॥ २२ ॥

मानुष्यकाचरितमाचरितुं प्रवृत्तो
देवातिगं चरितमङ्ग! किमङ्ग्यकार्षीः।
यत् सागरे बत बबन्धिथ नाथ! सेतुं
शैलैः प्लवङ्गमसमिङ्गितसम्प्रणुन्नैः॥ २३ ॥

यो विक्रमेण मनुजत्वविभूषणेन
देवं वरं वरुणराजं अज! व्यजेष्ठाः।
कृत्वोपदां दशरथं विधिरुद्रमुख्यैः
देवैः स्तुतश्च स किलेन्द्रजिता जितोऽसि॥ २४ ॥

अब्धिं न तेरिथ जिगेथ न राक्षसेन्द्रं
नैवास्य जज्ञिथ यदा च बलाबलं त्वम्।
निस्संशयः सपदि तस्य पदेऽभ्यषिञ्चः
तस्यानुजं कथमिदं हि विभीषणं च॥ २५ ॥

त्वं दक्षिणस्य निवसन् उदधेस्तटेऽपि
    दूरान्तरोत्तरपयोधिमहान्तरीपे।
दैत्यान् निजैकशरपारणयन् किमेतां
    लङ्कां स्थितोऽत्र कुरुषे न किल स्म भस्म॥ २६ ॥

यत् तादृशागसमरिं रघुवीर वीक्ष्य
    विश्रम्यतां इति मुमोचिथ मुग्धमाजौ।
कोऽयं गुणः कतरकोटिगतः कियान् वा
    कस्य स्तुतेः पदमहो बह कस्य भूमिः॥ २७ ॥

एतेन वै सुविदितोऽभवदिन्द्रशत्रोः
    मायास्त्रबन्धननिबन्धनजो विमोहः।
यल्लक्ष्मणस्त्वदनुजो रिपुशक्तिमुग्धः
    शत्रोर्गुरुः हनुमतस्तु लघुत्वमाप॥ २८ ॥

हा हन्त हन्त भवतश्चरणारविन्द-
    द्वन्द्वं कदा नु विषयीभविता ममाक्ष्णोः।
योऽहं निरर्गळविनिर्गळदन्धकारैः
    वृक्षैस्तृणैश्च सुलभं समयं व्यतीतः॥ २९ ॥

वंशं रघोरनुजिघृक्षुरिहावतीर्णः
    दिव्यैर्ववर्षिथ तथाऽत्र भवद्गुणौघैः।
त्वत्सन्निधिप्रभवशैत्यजुषो यथा ही
    वृक्षाश्च तान्तिमभजन्त भवद्वियोगे॥ ३० ॥

ये धर्ममाचरितुं अभ्यसितुं च योगं
    बोद्धुं च किञ्चन न जात्वधिकारभाजः।
तेऽपि त्वदाचरितभूतलबन्धगन्धाद्
    बन्धातिगाः परगतिं गमितास्तृणाद्याः॥ ३१ ॥

तादृग्गुणो ननु बभूविथ राघवत्वे
    यस्तावकं चरितमन्वहं अन्वभुङ्क्त।

सोऽत्रैव हन्त ! हनुमान् परमां विमुक्तिं
बुद्ध्वाऽवधूय चरितं तव सेवतेऽसौ॥ ३२॥

यस्त्वं कृतागसमपि प्रणतिप्रसक्तं
तं वायसं परमया कृपयाऽक्षमिष्ठाः।
तेनैव मादृशजनस्य महागसोऽपि
युक्तं समाश्वसनं इत्युपधारयामि॥ ३३॥

सा पूतना शकटं अर्जुनयोश्च युग्मं
बाल्योचितान्यपरचेष्टितविष्फुलिङ्गे।
यस्यालभन्त शलभत्वमहो ! निगूढः
स त्वं व्रजे ववृधिषे किल कंसभीत्या॥ ३४॥

पश्यत्सु सूरिषु सदा परमं पदं ते
देव्या श्रिया सह वसन् परया विभूत्या।
योगेन योगनिरतैः परिमृग्यमाणः
किं त्वं व्रजेषु नवनीतमहो ! व्यमुष्णाः॥ ३५॥

यं दुर्ग्रहं सुमनसो मनसाऽपि नित्यं
बन्धच्छिदं परममीशमुदाहरन्ति।
दाम्ना निबद्ध इति शुश्रुम तं भवन्तं
नालं बभूविथ बत श्लथनाय तस्य॥ ३६॥

ऐशं हि शैशवमपि व्यतिवेलखेलं
यत् पूतना शकटं अर्जुनयोश्च युग्मम्।
बाल्योचितान्यपरसाचिविचेष्टितेन
हन्तालभन्त शलभायितमोजसस्ते॥ ३७॥

सत्येव गव्यनिवहे निजधाम्नि भूम्ना
पर्यन्तसद्मसु किमर्थं अचूचुरस्त्वम्।
मुष्णन् च किं व्यजघटो घटशेषमग्रे
गोपीजनस्य परिहासपदं किमासीः॥ ३८॥

यन्नाम नाथ! नवनीतं अचूचुरस्त्वं
तच्छादनाय यदि ते मतिराविरासीत्।
किं मुग्ध! दिग्धममुना करपल्लवं ते
गात्रे प्रमृज्य निरगाः किल निर्विशङ्कः॥ ३९ ॥

त्वामन्यगोपगृहगव्यमुषं यशोदा
गुर्वी त्वदीयमवमानममृष्यमाणा।
प्रेम्णाऽथ दामपरिणामजुषा बबन्ध
तादृक् न ते चरितं आर्यजनाः सहन्ते॥ ४० ॥

मात्रा यदि त्वमसि दामनि सन्निबद्धः
तच्छ्राविणां उदितचाक्षुष निर्झराणाम्।
बध्नासि हन्त हृदयं भगवन्! कुतस्तत्
सर्वो हि वश्यविषये विवृणोति वीर्यम्॥ ४१ ॥

कान्तालकान्तममलं कमलायताक्षं
उद्भ्रूविलासं उदितस्मितं उन्नसं च।
वक्त्रं वहन् परम! गोपगृहेषु किं त्वं
गोपीमनांसि नवनीतमुताभ्यमोषीः॥ ४२ ॥

सर्वं गुणाय गुणिनां इति सत्यमेतत्
यत् खल्विहेतरजने मलिनत्वहेतुः।
यद् गोपवेषविनिवेषणमुत्तमं ते
गोपालनं च गणयन्ति गुणं गुणेषु॥ ४३ ॥

गोपालपोतकतया निभृतं धरित्रीं
आवस्तुकाम इव सन्नपि बाल्यलौल्यात्।
ऐन्द्रं निहत्य महं अद्रिमथो दधानः
किं तस्थिषे सुरगणाय सवासवाय॥ ४४ ॥

वेणुक्वणप्रणयिनि त्वयि लोकनाथ!
बृन्दावनं चरणसञ्चरणैः पुनाने।

भावास्तदा वनभुवः किल कीदृशस्ते
त्वद्गीतसिक्तसिकतासु वसुन्धरासु॥ ४५ ॥

धन्यैः श्रुतं तदिह तावकरासकाले
गीतेन येन हि शिलाः सलिलाम्बभूवुः।
पञ्चापि किञ्च परिवृत्तगुणानि भूतानि
उर्वीकृशानुमरुदम्बरशंबराणि॥ ४६ ॥

तेभ्यः कृती न किल कश्चिदिहास्ति ये वै
रासोत्सवोत्सुकधियस्तव काननान्ते।
वेणुस्वनस्रुत रसौघपरिप्लुतान्ते
स्वे सृक्वणी रसनया लिलिहुर्भुजङ्गाः॥ ४७ ॥

अम्भोदनीलं अरविन्ददळायताक्षं
पिञ्छावतंसं उररीकृतवेणुपाणिम्।
त्वां गोपवेषपरिकर्मितकायकान्तिं
धन्यास्तदा ददृशुरुन्मथितान्यभावाः॥ ४८ ॥

गोवर्धनो गिरिवरो यमुना नदी सा
बृदावनं च मथुरा च पुरी पुराणी।
अद्यापि हन्त! सुलभाः कृतिनां जनानां
एते भवच्चरणचारजुषः प्रदेशाः॥ ४९ ॥

बृन्दावने स्थिरचरात्मककीटदूर्वा-
पर्यन्तजन्तुनिचये बत ये तदानीम्।
नैवालभामहि जनिं हतकास्त एते
पापाः पदं तव कदा पुनराश्रयामः॥ ५० ॥

हा जन्म तासु सिकतासु मया न लब्धं
रासे त्वया विरहिताः किल गोपकन्याः।
यास्तावकीनपदपङ्क्तिजुषोऽजुषन्त
निक्षिप्य तत्र निजमङ्गमनङ्गतप्तम्॥ ५१ ॥

आचिन्वतः कुसुममङ्घ्रिसरोरुहं ते
ये भेजिरे बत! वनस्पतयो लता वा।
अद्यापि तत्कुलभुवः कुलदैवतं मे
बृन्दावनं मम धियं च सनाथयन्ति॥ ५२॥

यत् त्वत्प्रियं तदिह पुण्यं अपुण्यमन्यत्
नान्यत् तयोर्भवति लक्षणमत्र जातु।
धूर्तायितं तव हि यत् किल रासगोष्ठ्यां
तत्कीर्तनं परमपावनं आमनन्ति॥ ५३॥

या कंसमुख्यनृपकीटनिबर्हणोत्था
सा निर्जितत्रिजगतस्तव नैव कीर्तिः।
गोपालनादि यदिदं भवदीयकर्मे-
त्यार्द्रीकरोति विदुषां हृदयं तदेतत्॥ ५४॥

गोपालवेषपरिकर्म परावरेशं
यन्नाम धाम परमं तमसः परस्तात्।
तत् पिञ्छलाञ्छनसुदामकृतोपवीतं
गोधूलिधूसरितकुन्तलं अन्तरास्ताम्॥ ५५॥

यद्वै जरासुतभयाद् विपलायथास्त्वं
तच्चेन्मनुष्य चरितानुविधानजं ते।
तर्हि त्रिलोकगुरुं ईश्वरमीश्वराणां
बाणाहवे किमिति शम्भुं अजृम्भयस्त्वम्॥ ५६॥

जातं कुतस्तदकृतज्ञविचेष्टितं ते
पुत्रीयया किल वरं ववृषे वृषाङ्कात्।
अक्षेषु सक्तमतिना च निरादरेण
वाराणसी हरपुरी भवता विदग्धा॥ ५७॥

सञ्जीवयन् अपि मृतं सुतमुत्तरायाः
सान्दीपनेश्चिरमृतं सुतमानयन् च।

धाम्नो निजाद् द्विजसुतान् पुनरानयन् वा
स्वामेव तां तनुमहो ! कथमानयस्त्वम्॥ ५८ ॥

अद्यापि नास्त्युपरतिः त्रिविधापचारात्
पापः परे निपतितोऽस्मि तमस्यपारे।
एतादृशोऽहमगतिर्भवतो दयायाः
पात्रं त्वदीयचरणौ शरणं प्रपद्ये॥ ५९ ॥

विस्रम्भणं त्वयि न यद्यपि मेऽस्ति नापि
श्रद्धा यथोक्तवचनार्थगता तथाऽपि।
वाचं त्विमां सकृदथाप्यसकृन्मयोक्तां
सत्यां कुरुष्व दययैव दयैकसिन्धो॥ ६० ॥

पापीयसोऽपि शरणागतिशब्दभाजो
नोपेक्षणं मम तवोचितमीश्वरस्य।
त्वज्ज्ञानशक्तिकरुणासु सतीषु नैव
पापं पराक्रमितुमर्हति मामकीनम्॥ ६१ ॥

॥ इति श्री अतिमानुषस्तवः समाप्तः ॥

श्रीः

# ॥ श्रीसुन्दरबाहुस्तवः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळ सूत्रताम्॥

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं
श्रीरामावरजमुनीन्द्रलब्धबोधः।
निर्भीकस्तत इह सुन्दरोरुबाहुं
स्तोष्ये तच्चरणविलोकनाभिलाषी॥ १ ॥

सुन्दरायतभुजं भहामहे वृक्षषण्डमयमद्रिं आश्रितम्।
यत्र सुप्रथितनूपुरापगा तीर्थं अर्थितफलप्रदं विदुः॥ २ ॥

क्वचित् त्वरितगामिनी क्वचन मन्दमन्दालसा
क्वचित् स्खलितविह्वला क्वचन फेनिला सारवा।
पतन्त्यपि किल क्वचित् व्रजति नूपुराह्वा नदी
सुसुन्दरभुजाह्वयं मधु निपीय मत्ता यथा॥ ३ ॥

उदधिगमन्दराद्रिमथिमन्थनलब्धपयो-
मधुररसेन्दिराह्वसुध सुन्दरदोः परिघम्।
अशरणमादृशात्मशरणं शरणार्थिजन-
प्रवणधियं भजेम तरुषण्डमयाद्रिपातिम्॥ ४ ॥

शशधररिङ्खणाढ्यशिखं उच्छिखरप्रकरं
तिमिरनिभप्रभूततरुषण्डमयं भ्रमदम्।
भिदुरितसप्तलोकसुविशृङ्खलशङ्खरवं
वनगिरिं आवसन्तं उपयामि हरिं शरणम्॥ ५ ॥

यत्तुङ्गशृङ्गविनिषङ्गिसुराङ्गनानां
न्यस्तोर्ध्वपुण्ड्रमुखमण्डनमण्डितानाम्।

दर्पण्यभूत् धृतमपङ्कशशाङ्कपृष्ठं
तद् धाम सुन्दरभुजस्य महान् वनाद्रिः॥ ६ ॥

यदीयशिखरागतां शशिकलां तु शाखामृगाः
निरीक्ष्य हरशेखरीभवनं आमृशन्तस्ततः।
स्पृशन्ति न हि देवतान्तरसमाश्रितेति स्फुटं
स एष सुमहातरुव्रजगिरिः गृहं श्रीपतेः॥ ७ ॥

सुन्दरदोर्दिव्याज्ञा लम्भनकातरवशानुयायिनि करिणि।
प्रणयजकलहसमाधिः यत्र वनाद्रिः स एष सुन्दरदोष्णः॥ ८ ॥

स एष सौन्दर्यनिधेः धृतश्रियो
वनाचलो नाम सुधाम यत्र हि।
भुजङ्गराजस्य कुलस्य गौरवात्
न खण्डिताः कुण्डलिनः शिखण्डिभिः॥ ९ ॥

वृषगिरिरयं अच्युतस्य यस्मिन्
स्वमतमलङ्घयितुं परस्परेभ्यः।
खगपतिचरणौ खगाः शपन्ते
भुजगपतेर्भुजगाश्च सर्व एव॥ १० ॥

हरिकुलं अखिलं हनूमदङ्घ्रिं
स्वकुलपजाम्बवतस्ततहिव भल्लाः।
निजकुलपजटायुषश्च गृध्राः
स्वकुलपतेश्च गजा जगेन्द्रनाम्नः॥ ११ ॥

वकुळधरसरस्वतीविषक्त स्वररसभावयुतासु किन्नरीषु।
द्रवति दृषदपि प्रसक्तगानास्विह वनशैलतटीषु सुन्दरस्य॥ १२ ॥

भृङ्गी गायति हंसतालनिभृतं तत् पुष्णती कोकिलाऽपि
उद्गायत्यथ वल्लितल्लजमुखादास्रं मधु स्यन्दते।
निस्स्पन्दस्तिमिताः कुरङ्गततयः शीतं शिलासैकतं
सायाह्ने किल यत्र सुन्दरभुजस्तस्मिन् वनक्ष्माधरे॥ १३ ॥

पीताम्बरं वरदशीतलदृष्टिपातं
आजानुलम्बिभुजं आयतकर्णपाशम्।
श्रीमन्महावनगिरीन्द्रनिवासदीक्षं
लक्ष्मीधरं किमपि वस्तु ममाविरस्तु॥ १४ ॥

जनिजीवनाप्ययविमुक्तयो यतो
जगतामिति श्रुतिशिरस्सु गीयते।
तदिदं समस्तदुरितैकभेषजं
वनशैलसम्भवं अहं भजे महः॥ १५ ॥

सद्ब्रह्मात्मपदेस्त्रयीशिरसि यो नायायणोक्त्या तथा
व्याख्यातो गतिसाम्यलब्धविषयानन्यत्वबोधोज्ज्वलैः।
निस्तुल्यादिकं अद्वितीयममृतं तं पुण्डरीकेक्षणं
प्रारूढश्रियं आश्रमे वनगिरेः कुञ्जोदितं सुन्दरम्॥ १६ ॥

पतिं विश्वस्यात्मेश्वरं इति परं ब्रह्म पुरुषः
परं ज्योतिस्तत्त्वं परमपि च नारायण इति।
श्रुतिर्ब्रह्मेशादीन्स्तदुदितविभूतींस्तु गृणती
यमाहारूढश्रीः स वनगिरिधामा विजयते॥ १७ ॥

पृथिव्याद्यात्मान्तं नियमयति यस्तत्त्वनिकरं
तदन्तर्यामी तद्वपुरविदितस्तेन भगवान्।
स एष स्वैश्वर्यं नविजहदशेषं वनगिरिं
समध्यासीनो नो विशतु हृदयं सुन्दरभुजः॥ १८ ॥

प्रत्यगात्मनि कदाऽप्यसम्भवद्भूमभूमिमभिवक्ति यं श्रुतिः।
तं वनाद्रिनिलयं सुसुन्दरं सुन्दरायतभुजं भजामहे॥ १९ ॥

वन्देय सुन्दरभुजं भुजगेन्द्रभोग-
सक्तं महावनगिरिप्रणयप्रवीणम्।
यं तं विदुर्दहरमष्टगुणोपजुष्टं
आकाशं औपनिषदीषु सरस्वतीषु॥ २० ॥

यत् स्वायत्तस्वरूपस्थितिकृतिकनिजेच्छानियाम्यस्वशेषा-
नन्ताशेषप्रपञ्चस्तत इह चिदिवाचिद्वपुर्वाचिशब्दैः।
विश्वैः शब्दैः प्रवाच्यो हतवृजिनतया नित्यमेवानवद्यः
तं वन्दे सुन्दराह्वं वनगिरिनिलयं पुण्डरीकायताक्षम्॥ २१॥

गुणजं गुणिनो हि मङ्गळत्वं प्रमितं प्रत्युत यत्स्वरूपमेत्य।
तमनन्तसुखावबोधरूपं विमलं सुन्दरबाहुमाश्रयामः॥ २२॥

अतिपतितावधिस्वमहिमानुभवप्रभवत्-
सुखकृतनिस्तरङ्गजलधीयितनित्यदशम्।
प्रतिभटमेव हेयनिकरस्य सदाऽप्रतिमं
हरिमिह सुन्दराह्वं उपयामि वनाद्रितटे॥ २३॥

सदा षाड्गुण्याख्यैः पृथुलबलविज्ञानशकन-
प्रभावीर्यैश्वर्यैरवधिविधुरैरेधितदशम्।
द्रुमस्तोमक्ष्माभृत्परिसरमहोद्यानमुदितं
प्रपद्येऽध्यारूढश्रियं इममहं सुन्दरभुजम्॥ २४॥

सौशील्याश्रितवत्सलत्वमृदुतासौहार्दसाम्यार्जवैः
धैर्यस्थैर्यसुवीर्यशौर्यकृतितागाम्भीर्यचातुर्यकैः।
सौन्दर्यान्वितसौकुमार्यसमतालावण्यमुख्यैर्गुणैः
देवः श्रीतरुषण्डशैलनिलये नित्यं स्थितः सुन्दरः॥ २५॥

येष्वेकस्य गुणस्य विप्रुडपि वै लोकोत्तरं स्वाश्रयं
कुर्यात् तादृशवैभवैरगणितैर्निस्सीमभूमान्वितैः।
नित्यैर्दिव्यगुणैस्ततोऽधिकशुभत्वैकास्पदात्माश्रयैः
इद्धं सुन्दरबाहुमस्मि शरणं यातो वनाद्रीश्वरम्॥ २६॥

सदा समस्तं जगदीक्षते हि यः
प्रत्यक्षदृष्ट्या युगपद्भुवा स्वतः।
स ईदृशज्ञाननिधिर्निधिस्तु नः
सिंहाद्रिकुञ्जेषु चकास्ति सुन्दरः॥ २७॥

ऐश्वर्यतेजोबलवीर्यशक्तयः
कीदृग्विधाः सुन्दरबाहुसंश्रयाः।
योऽसौ जगज्जन्मलयस्थितिक्रियाः
सङ्कल्पतोऽल्पादुपकल्पयत्यजः॥ २८ ॥

यत् कल्पायुतभोगतोऽपि कृशतां यायान्न तावत्फलं
येष्वेकस्य तथाविधैः सततजैरंहोभिरुत्सीममिः।
अस्तादाविह संसृतावुपचितैश्छन्नं सुसन्नं जनं
सन्नत्या क्षमते क्षणाद् वनगिरिप्रस्थप्रियः सुन्दरः॥ २९ ॥

यज्जातीयो यादृशो यत्स्वभावो
पादच्छायां संश्रितो योऽपि कोऽपि।
तज्जातीयस्तादृशस्तत्स्वभावः
श्लिष्यत्येनं सुन्दरो वत्सलत्वात्॥ ३० ॥

निहीनो जात्या वा भृशमकुशलैर्वा स्वचरितैः
पुमान् वै यः कश्चिद् बहुतृणमपि स्यादगुणतः।
श्रयन्तं तं पश्येद् भुजगपतिना तुल्यमपि यो
वनाद्रिप्रस्थस्थः स मम शरणं सुन्दरभुजः॥ ३१ ॥

एकैकमङ्गळगुणानुभवाभिनन्दं
ईदृक् त्वियानिति च सुन्दरदोष्णि कृष्णे।
ते ये शतं त्विति नियन्तुमनाः श्रुतिर्वै
नैवेष वाङ्मनसगोचर इत्युदाह॥ ३२ ॥

अब्जपादं अरविन्दलोचनं
पद्मपाणितलं अञ्जनप्रभम्।
सुन्दरोरुभुजं इन्दिरापतिं
वन्दिषीय वरदं वनाद्रिगम्॥ ३३ ॥

कनकमरकताञ्जनद्रवाणां
मथनसमुत्थितसारमेलनोत्थम्।

जयति किमपिरूपमस्य तेजो
वनगिरिनन्दनसुन्दरोरुबाहोः॥ ३४ ॥

किं नु स्वयं स्वात्मविभूषणं भवन्
असावलङ्कार इतीरितो जनैः।
वर्द्धिष्णुबालद्रुमषण्डमण्डितं
वनाचलं वा परितः प्रसाधयन्॥ ३५ ॥

सुखस्पर्शैर्नित्यैः कुसुमसुकुमाराङ्गसुखदैः
सुसौगन्ध्यैर्दिव्याभरणगणदिव्यायुधगणैः।
अलङ्कार्यैः सर्वैर्निगदितं अलङ्कार इति यः
समाख्यानं धत्ते स वनगिरिनाथोऽस्तु शरणम्॥ ३६ ॥

मकुटमकुटमालोत्तंसचूडाललाम-
स्वलकतिलकमालाकुण्डलैः सोर्ध्वपुण्ड्रैः।
मणिवरवनमालाहारकेयूरकण्ठ्यैः
तुलसिकटककाञ्चीनूपुराद्यैश्च भूषैः॥ ३७ ॥

असिजलजरथाङ्गैः शार्ङ्गकौमोदकीभ्यां
अगणितगुणजालैरायुधैरप्यथान्यैः।
सततविततशोभं पद्मनाभं वनाद्रेः
उपवनसुखलीलं सुन्दरं वन्दिषीय॥ ३८ ॥

आजानजस्वगतबन्धुरगन्धलुब्ध-
भ्राम्यद्विदग्धमधुपालिसदेशकेशम्।
विश्वाधिराज्यपरिबर्हकिरीटराजं
हे! सुन्दरस्य बत सुन्दरमुत्तमाङ्गम्॥ ३९ ॥

अन्धं तमस्तिमिरनिर्मितमेव यत् स्यात्
तत्सारसाधितसुतन्त्वतिवृत्तवार्तम्।
ईशस्य केशव गिरेरलकालिजालं
तत्तुल्यकुल्यमधुपाढ्यमहावनस्य॥ ४० ॥

जुष्टाष्टमीकज्वलदिन्दुसन्निभं
धृतोर्ध्वपुण्ड्रं विलसद्विशेषकम्।
भूम्ना ललाटं विपुलं विराजते
वनाद्रिनाथस्य समुच्छ्रितश्रियः॥ ४१ ॥

सुचारुचापद्वयविभ्रमं भ्रुवोः
युगं सुनेत्राह्वसहस्रपत्रयोः।
उपान्तगं वा मधुपावलीयुगं
विराजते सुन्दरबाहुसंश्रयम्॥ ४२ ॥

अदीर्घमप्रेमदुघं क्षणोज्ज्वलं
नचोरमन्तः करणस्य पश्यताम्।
अनुब्जमब्जं नु कथं निदर्शनं
वनाद्रिनाथस्य विशालयोर्दृशोः॥ ४३ ॥

प्रश्चयोतत्प्रेमसारामृतरसचुलकप्रक्रमप्रक्रियाभ्यां
विक्षिप्तालोकितोर्मिप्रसरणमुषितस्वान्तकान्ताजनाभ्याम्।
विश्वोत्पत्तिप्रवृत्तिस्थितिलयकरणैकान्तशान्तक्रियाभ्यां
देवोऽलङ्कारनामा वनगिरिनिलयो वीक्षतामीक्षणाभ्याम्॥ ४४ ॥

प्रेमामृतौघपरिवाहिमहाक्षिसिन्धु
मध्ये प्रबद्धसमुदञ्चितसेतुकल्पा।
ऋज्वी सुसुन्दरभुजस्य विभाति नासा
कल्पद्रुमाङ्कुरनिभा वनशैलभर्तुः॥ ४५ ॥

व्याभाषिताभ्यधिकनन्दनभन्दनर्द्धि
मन्दस्मितामृतपरिस्रवसंस्तवाढ्यम्।
आभाति विद्रुमसमाधरमास्यमस्य
देवस्य सुन्दरभुजस्य वनाद्रिभर्तुः॥ ४६ ॥

यशोदाङ्गुल्यग्रोन्नमितचिबुकाघ्राणमुदितौ
कपोलावद्यापि ह्यनुपरततद्धर्षगमकौ।

विराजेते विष्वग्विततसहकारासवरस
प्रमाद्यद्भृङ्गाढ्यद्रुमवनगिरेः सुन्दरहरेः॥ ४७ ॥

व्यालम्बिकुण्डलं उदग्रसुवर्णपुष्प
निष्पन्नकल्पलतिकायमलानुकारम्।
यत्कर्णपाशयुगलं निगलं धियां नः
सोऽयं सुसुन्दरभुजो वनशैलभूषा॥ ४८ ॥

सदंससंसञ्जितकुन्तलान्तिका-
वतीर्णकर्णाभरणाढ्यकन्धरः।
सुबन्धुरस्कन्धनिबन्धनो युवा
सुसुन्दरः सुन्दरदोर्विजृम्भते॥ ४९ ॥

व्यूढगूढभुजजत्रुं उल्लसत्कम्बुकन्धरधरं धराधरम्।
वृक्षषण्डमयभूभृतस्तटे सुन्दरायतभुजं भजामहे॥ ५० ॥

मन्दरभ्रमणविभ्रमोद्भटाः सुन्दरस्य विलसन्ति बाहवः।
इन्दिरासमभिनन्दभन्दनाः चन्दनागुरुविलेपभूषिताः॥ ५१ ॥

ज्याकिणाङ्कपरिकर्मधर्मिणो भान्ति सुन्दरभुजस्य बाहवः।
पारिजातविटपायितर्द्धयः प्रार्थितार्थपरिदानदीक्षिताः॥ ५२ ॥

सागराम्बरतमालकानन श्यामलर्द्धय उदारपीवराः।
शेषभोगपरिभोगभागिनः तन्निभा वनगिरीशितुर्भुजाः॥ ५३ ॥

अहमहमिकाभाजो गोवर्धनोद्धृतिनर्मणि
प्रमथनविधावब्धेर्लब्धप्रबन्धसमक्रियाः।
अभिमतबहूभावाः कान्ताभिरम्भणसम्भ्रमे
वनगिरिपतेर्बाहाः शुम्भन्ति सुन्दरदोर्हरेः॥ ५४ ॥

श्रीमद्वनाद्रिपतिपाणितलाब्जयुग्मं
आरूढयोर्विमलशङ्खरथाङ्गयोस्तु।

एकोऽब्जमाश्रित इवोत्तमराजहंसः
पद्मप्रियोऽर्क इव तत्समितो द्वितीयः॥ ५५॥

लक्ष्म्याः पदं कौस्तुभसंस्कृतं च
श्रीवत्सभूमिर्विमलं विशालम्।
विभाति वक्षो वनमालयाऽऽढ्यं
वनाद्रिनाथस्य सुसुन्दरस्य॥ ५६॥

सौन्दर्यामृतसारपूरपरिवाहावर्तगर्तायितं
यातः किञ्च विरिञ्चिसम्भवनभूम्यभोजसम्भूतिभूः।
नाभिः शुम्भति कुम्भिकुम्भनिभनिर्भातस्तनस्वर्वधू-
सम्भुक्तद्रुमषण्डशैलवसतेरारूढलक्ष्म्या हरेः॥ ५७॥

सुन्दरस्य किल सुन्दरबाहोः श्रीमहातरुवनाचलभर्तुः
हन्तः! यत्र निवसन्ति जगन्ति प्रापितक्रशिम तत् तनुमध्यम्॥ ५८॥

पिष्टदुष्टमधुकैटभकीटौ हस्तिहस्तयुगलाभसुवृत्तौ।
राजतः क्रमकृशौ च सदूरू सुन्दरस्य वनभूधरभर्तुः॥ ५९॥

यौवनवृषककुदोद्भेदनिभं नितरां
भाति विभोरुभयं जानु शुभाकृतिकम्।
सुन्दरभुजनाम्नो मन्दरमथिताब्धेः
चन्दनवनविलसत्कन्दरवृषभपतेः॥ ६०॥

अधोमुखं न्यस्तपदारविन्दयोः
रुदञ्चितोदात्तसुनालसन्निभे।
विलङ्घ्य जङ्घे क्व नु रंहतो दृशौ
वनाद्रिनाथस्य सुसुन्दरस्य मे॥ ६१॥

सुसुन्दरस्यास्य पदारविन्दे
पादारविन्दाधिकसौकुमार्ये।
अतोऽन्यथा ते बिभृयात् कथं नु
तदासनं नाम सहस्रपत्रम्॥ ६२॥

सौन्दर्यमार्दवसुगन्धरसप्रवाहैः
एते हि सुन्दरभुजस्य पदारविन्दे।
अम्भोजडम्भपरिम्भणं अभ्यजैष्टां
तद् वै पराजितमिमे शिरसा बिभर्ति॥ ६३ ॥

एते ते बत सुन्दराह्वयजुषः पादारविन्दे शुभे
यन्निर्णेजसमुत्थितत्रिपथगास्रोतस्सु किञ्चित् किल।
धत्तेऽसौ शिरसा ध्रुवः तदपरं स्रोतो भवानीपतिः
यस्यास्यालकनन्दिकेति निजगुः नामैवं अन्वर्थकम्॥ ६४ ॥

आम्नायकल्पलतिकोत्थसुगन्धिपुष्पं
योगीन्द्रहार्दसरसीरुहराजहंसम्।
उत्पक्वधर्मसहकारफलप्रकाण्डं
वन्देय सुन्दरभुजस्य पदारविन्दम्॥ ६५ ॥

सुसुन्दरस्यास्य तु वामनाकृतेः
क्रमत्रयप्रार्थिनि मानसे किल।
इमे पदे तावदिहासहिष्णुनी
विचक्रमाते त्रिजगत् पदद्वये॥ ६६ ॥

सौन्दर्यसारामृतसिन्धुवीची-
श्रेणीषु पादाङ्गुलिनामिकासु।
न्यक्कृत्य चन्द्रश्रियमात्मकान्त्या
नखावली शुम्भति सुन्दरस्य॥ ६७ ॥

यो जातक्रशिमा मली च शिरसा सम्भावितः शम्भुना
सोऽयं यच्चरणाश्रयी शशधरो नूनं नखव्याजतः।
पूर्णत्वं विमलत्वमुज्ज्वलतया सार्धं बहुत्वं तथा
यातस्तं तरुषण्डशैलनिलयं वन्दामहे सुन्दरम्॥ ६८ ॥

यस्याः कटाक्षणं अनुक्षणं ईश्वराणां
ऐश्वर्यहेतुरिति सर्वजनीनमेतत्।

श्रीः सेति सुन्दरनिषेवणतो निराहुः
तं हि श्रियः श्रियमुदाहुरुदारवाचः॥ ६९ ॥

दिव्याचिन्त्यमहाद्भुतोत्तमगुणैस्तारुण्यलावण्यक-
प्रायैरद्भुतभावगर्भसततापूर्वप्रियैर्विभ्रमैः।
रूपाकारविभूतिभिश्च सदृशीं नित्यानपेतां श्रियं
नीलां भूमिमपीदृशीं रमयिता नित्यं वनाद्रीश्वरः॥ ७० ॥

अन्योन्यचेष्टितनिरीक्षणहार्दभाव-
प्रेमानुभावमधुरप्रणयप्रभावः।
आजस्रनव्यतरदिव्यरसानुभूतिः
स्वां प्रेयसीं रमयिता वनशैलनाथः॥ ७१ ॥

सुन्दरस्य वनशैलवासिनो
भोगमेव निजभोगमाभजन्।
शेष एष इति शेषताकृतेः
प्रीतिमान् अहिपतिः स्वनामनि॥ ७२ ॥

वाहनासनवितानचामराद्याकृतिः खगपतिस्त्रयीमयः।
नित्यदास्यरतिरेव यस्य वै ह्येष सुन्दरभुजो वनाद्रिगः॥ ७३ ॥

वनाद्रिनाथस्य सुसुन्दरस्य वै
प्रभुक्तशिष्टाश्यथ सेन्यसत्पतिः।
समस्तलोकैकधुरन्धरः सदा
कटाक्षवीक्ष्योऽस्य च सर्वकर्मसु॥ ७४ ॥

छत्रचामरमुखाः परिच्छदाः
सूरयः परिजनाश्च नैत्यगाः।
सुन्दरोरुभुजमिन्धते सदा
ज्ञानशक्तिमुखनित्यसद्गुणाः॥ ७५ ॥

द्वारनाथगणनाथतल्लजाः पारिषद्यपदभागिनस्तथा।
मामकाश्च गुरवः पुरातनाः सुन्दरं वनमहीध्रगं श्रिताः॥ ७६ ॥

ईदृशैः परिजनैः परिच्छदैः
नित्यसिद्धनिजभोगभूमिगः।
सुन्दरो वनगिरेस्तटीषु वै
रज्यते सकलदृष्टिगोचरः॥ ७७॥

आक्रीडभूमिषु सुगन्धिषु पौष्पिकीषु
वैकुण्ठधामनि समृद्धसुवापिकासु।
श्रीमल्लतागृहवतीषु यथा तथैव
लक्ष्मीधरः सजति सिंहगिरेस्तटीषु॥ ७८॥

आनन्दमन्दिरमहामणिमण्टपान्तः
लक्ष्म्या भुवाऽप्यहिपतौ सह नीलया च।
निस्सङ्ख्यनित्यनिजदिव्यजनैकसेव्यो
नित्यं वसन् सजति सुन्दरदोर्वनाद्रौ॥ ७९॥

प्रत्यर्थिनि त्रिगुणकप्रकृतेरसीम्नि
वैकुण्ठधामनि पराम्बरनाम्नि नित्ये।
नित्यं वसन् परमसत्त्वमयेऽप्यतीत-
योगीन्द्रवाङ्मनस एष हरिर्वनाद्रौ॥ ८०॥

लोकांश्चतुर्दश दधत् किल सुन्दरस्य
पङ्क्तीगुणोत्तरितसप्तवृतीदमण्डम्।
अन्यानि चास्य सुसदृंशि परश्शतानि
क्रीडाविधेरिह परिच्छदतामगच्छन्॥ ८१॥

सुरनरतिर्यगादिबहुभेदकभिन्नमिदं
जगदथ चाण्डं अण्डवरणानि च सप्त तथा।
गुणपुरुषौ च मुक्तपुरुषाश्च वनाद्रिपतेः
उपकरणानि नर्मविधयेऽपि भवन्ति विभोः॥ ८२॥

ज्ञानिनः सततयोगिनो हि ये सुन्दराङ्घ्रिपरभक्तिभागिनः।
मुक्तिमाप्य परमां परे पदे नित्यकिङ्करपदं भजन्ति ते॥ ८३॥

देवस्य सुन्दरभुजस्य वनाद्रिभर्तुः
हे ! शीलवत्त्वं अथवाऽऽश्रितवत्सलत्वम्।
ऐशस्वभावमजहद्भिरिहावतारैः
योऽलञ्चकार जगदाश्रिततुल्यधर्मा॥ ८४ ॥

सिंहाद्रिनाथ ! तव वाङ्मनसातिवृत्तं
रूपं त्वतीन्द्रियमुदाह रहस्यवाणी।
एवं च न त्वमिह चेत् समवातरिष्यः
त्वज्ज्ञानभक्तिविधयोऽद्य मुधाऽभविष्यन्॥ ८५ ॥

ये भक्ता भवदेकभोगमनसोऽनन्यात्मसञ्जीवनाः
तत्संश्लेषणतद्विरोधिनिधनाद्यर्थं वनाद्रीश्वरः !।
मध्येऽण्डं यदवातरः सुरनराद्याकारदिव्याकृतिः
तेनैव त्रिदशैर्नरैश्च सुकरं स्वप्रार्थितप्रार्थनम्॥ ८६ ॥

श्रीमन् ! महावनगिरीश ! विधीशयोस्ते
मध्ये तु विष्णुरिति यः प्रथमावतारः।
तेनैव चेत् तव महिम्नि जनाः किलान्धाः
त्वन्मत्स्यभावमवगम्य कथं भवेयुः॥ ८७ ॥

हे ! देव ! सुन्दरभुज त्वमिहाण्डमध्ये
सौलभ्यतो विसदृशं चरितं महिम्नः।
अङ्गीकरोषि यदि तत्र सुरैरमीभिः
साम्यान्निकर्षपरिपालनमेव साधु !॥ ८८ ॥

इहावतीर्णस्य वनाद्रिनाथ ! ते निगूहतः स्वं महिमानमैश्वरम्।
उमापतेः किं विजयः प्रियङ्करः प्रियङ्करा वेन्द्रजिदस्त्रबन्धना॥ ८९ ॥

पुच्छोत्पुच्छनमूर्च्छनोद्धतिधुतव्यावर्तितावर्तवत्-
संवर्तार्णवनीरपूरविलुठत्पाठीनदिव्याकृतेः।
सिंहाद्रीश ! न वैभवं तव कथं स्वालक्ष्यमालक्ष्यते
पद्माक्षस्य जुघुक्षतोऽपि विभवं लक्ष्मीधराधोक्षज !॥ ९० ॥

साचलावटतटाकदीर्घिका जाह्नवीजलधिवर्धितः क्षये।
शृङ्गसङ्गमितनौर्मनोरभूरग्रतोऽण्डजवपुर्हि सुन्दर!॥ ९१ ॥

प्रलयजनीरपूरपरिपूरितस्वनिलयावसन्नवदन-
भ्रमदशरण्यभूतशरणार्थिनाकिशरणं भवन् स्वकृपया।
चलदुदधीरिताम्बुकलुषीक्रियाढ्यगमनः स्वपृष्ठविधृता-
ऽचलकुल एष मीनतनुरत्र सुन्दरभुजो वनाद्रिविषयः॥ ९२ ॥

स्वपृष्ठे प्रष्ठाद्रिभ्रमणकरणैः किञ्च फणिनो
विकृष्टिव्याकृष्टिव्यतिविधुतदुग्धाब्धिचलितैः।
अविस्पन्दो नन्दन् विकसदरविन्देक्षणरुचिः
पुराऽभुः सिंहाद्रेः प्रयतम! हरे! कच्छपवपुः॥ ९३ ॥

जगत् प्रलीनं पुनरुद्दिधीर्षतः
सिंहक्षितिक्षिन्निलयस्थ! सुन्दर!।
पुरा वराहस्य तवेयमुर्वरा
दंष्ट्राह्वयेन्दोः किल लक्ष्मलक्षिता॥ ९४ ॥

न वायुः पस्पन्दे ययतुरथवाऽस्तं शशिरवी
दिशोऽनश्यन् विश्वाऽप्यचलदचला साचलकुला।
नभश्च प्रश्च्योति क्वथितमपि पाथो नरहरौ
त्वयि स्तम्भे शुम्भद्वपुषि सति हे सुन्दरभुज!॥ ९५ ॥

अरालं पातालं त्रिदशनिलयः प्रापितलयो
धरित्री निर्धूता ययुरपि दिशः कामपि दिशाम्।
अजृम्भिष्टाम्भोधिः घुमुघुमिति घूर्णन् सुररिपोः
विभिन्दाने वक्षस्त्वयि नरहरौ सुन्दरभुज!॥ ९६ ॥

नखक्रकचकप्रधिक्रथितदैत्यवक्षस्स्थली
समुत्थरुधिरच्छटाच्छुरितबिम्बितं स्वं वपुः।
विलोक्य रुषितः पुनः प्रतिमृगेन्द्रशङ्कावशाद्
य एष नरकेसरी स इह दृश्यते सुन्दरः॥ ९७ ॥

क्षितिरियं जनिसंहृतिपालनैः
निगिरणोद्गिरणोद्धरणैरपि।
वनगिरीश! तवैव सती कथं
वरद वामन भिक्षणमर्हति॥ ९८॥

भार्गवः किल भवान् भवन् पुरा कुन्दसुन्दरवनाचलेश्वर!।
अर्जुनस्य बलदर्पितस्य तु च्छेत्स्यति स्मरति बाहुकाननम्॥ ९९॥

आज्ञा तवात्रभवती विदिता त्रयी सा
धर्म तदुक्तमखिलेन वनाद्रिनाथ!।
अन्यूनमाचरितुं आस्तिकशिक्षणार्थं
अत्रावतीर्य किल सुन्दर! राघवोऽभूः॥ १००॥

वनगिरिपतिरीशितेति देवैः
त्रिपुरहरत्रिपुरघ्नचापभङ्गात्।
व्यगणि परशुरामदर्शितस्य
स्वकधनुषः परिमर्शदर्शनाच्च॥ १०१॥

अनवाप्तमत्र किल लिप्स्यते जनैः
न च लब्धमेतदिह भोक्तुमिष्यते।
अनवाप्तमत्र किल नास्ति राम! तद्
जगती त्वया तृणमवैक्षि सुन्दर!॥ १०२॥

शिखरिषु विपिनेष्वप्यापगास्वच्छतोयासु
अनुभवसि रसज्ञो दण्डकारण्यवासान्।
तदिह तदनुभूतौ साभिलाषोऽद्य राम
श्रयसि वनगिरीन्द्रं सुन्दरीभूय भूयः॥ १०३॥

उपवनतरुषण्डैर्मण्डिते गण्डशैल-
प्रणयिभवदुदन्तोद्गायिगन्धर्वसिद्धे।
वनगिरितटभूमिप्रस्तरे सुन्दर! त्वं
भजसि नु मृगयानानुद्रवश्रान्तिशान्तिम्॥ १०४॥

कलेऽब्धेः किल दक्षिणस्य निवसन् दूरोत्तरम्भोधिगान्
दैत्यान् एकपतत्रिणाऽच्छिन इतीयं किंवदन्ती श्रुता।
तत्रैवेश्वरमम्भसां व्यजयथाः! तस्माद् वनाद्रीश्वर!
श्रीमन्! सुन्दर! सेतुबन्धनमुखाः क्रीडास्तवाडम्बरम्॥ १०५॥

रघुकुलतिलक त्वं जातुचिद् यातुधान-
च्छलमृगमृगयायां सम्प्रसक्तः पुराऽभूः।
तदुपजनितखेदच्छेदनायाद्य गायन्-
मधुकरतरुषण्डं रज्यसे किं वनाद्रिम्॥ १०६॥

हे! सुन्दरैकतरजन्मनि कृष्णभावे
द्वे मातरौ च पितरौ च कुले अपि द्वे।
एकक्षणादनुगृहीतवतः फलं ते
नीला कुलेन सदृशी किल रुक्मणी च॥ १०७॥

त्वं हि सुन्दर! यदा स्तनन्धयः
पूतनास्तनमधास्तदा नु किम्।
जीर्णमेव जठरे पयोविषं
दुर्जरं वद तदात्मना सह॥ १०८॥

आश्रितेषु सुलभो भवन् भवान्
मर्त्यतां यदि जगाम सुन्दर!।
अस्तु नाम तदुलूखले कियद्
दामबद्ध इति किं तदाऽरुदः॥ १०९॥

सुन्दरोरुभुज! नन्दनन्दन-
स्त्वं भवन् भ्रमरविभ्रमालकः।
मन्दिरेषु नवनीततल्लजं
वल्लवीधियमुत व्यचूचुरः॥ ११०॥

कालियस्य फणतां शिरस्तु मे
सत्कदम्बशिखरत्वमेव वा।

वष्टि जुष्टवनशैल सुन्दर !
त्वत्पदाब्जयुगमर्पितं ययोः॥ १११ ॥

गूहितस्वमहिमाऽपि सुन्दर !
त्वं व्रजे किमिति शक्रमाक्रमीः।
सप्तरात्रमदधाश्च किं गिरिं
पृच्छतश्च सुहृदः किमक्रुधः॥ ११२ ॥

हे नन्दनन्दन ! सुसुन्दर सुन्दराह्व !
बृन्दावने विहरतस्तव वल्लवीभिः।
वेणुध्वनिश्रवणतस्तरुभिस्तदा वै
सद्भावभिर्जतुविलायमहो ! विलिल्ये॥ ११३ ॥

गायं गायं वनगिरिपते ! त्वं हि बृन्दावनान्तः
गोपीसङ्घैर्विहरसि यदा सुन्दरव्यूढबाहो।
रासारम्भोत्सवबहुविधप्रेम सीमन्तिनीनां
चेतश्चेतस्तव च तु तदा कां दशामन्वभूताम्॥ ११४ ॥

इङ्गितं निमिषतं च तावकं
रम्यमद्भुतमतिप्रियङ्करम्।
तेन कंसमुखकीटशासनं
सुन्दराल्पकमपि प्रशस्यते॥ ११५ ॥

वाराणसीदहन पौण्ड्रकभौमभङ्ग-
कल्पद्रुमाहरणशङ्करजृम्भणाद्याः।
अन्याश्च भारतबलक्रथनादयस्ते
क्रीडाः सुसुन्दरभुज ! श्रवणामृतानि॥ ११६ ॥

त्वं हि सुन्दर ! वनाद्रिनाथ ! हे
वेङ्कटाह्वयमहीध्र मूर्धनि।
देवसेवितपदाम्बुजद्वयः
संश्रितेभ्य इह तिष्ठसे सदा॥ ११७ ॥

हस्तिशैलनिलयो भवन् भवान्
साम्प्रतं वरदराजसाह्वयः।
इष्टमर्थमनुकम्पया ददद्
विश्वमेव दयते हि सुन्दर!॥ ११८ ॥

मध्येक्षीरपयोधि शेषशयने शेषे सदा सुन्दर!
त्वं तद्वैभवमात्मनो भुवि भवद्भक्तेषु वात्सल्यतः।
विश्राण्याखिलनेत्रपात्रमिह सन् सह्योद्भवायास्तटे
श्रीरङ्गे निजधाम्नि शेषशयने शेषे वनाद्रीश्वर!॥ ११९ ॥

कल्की भविष्यन् कलिकल्कदूषितान्
दुष्टान् अशेषान् भगवन् हनिष्यसि।
स एष तस्यावसरः सुसुन्दर!
प्रशाधि लक्ष्मीश! समक्षमेव नः॥ १२० ॥

ईदृशास्त्वदवतारसत्तमाः
सर्व एव भवदाश्रितान् जनान्।
त्रातुमेव न कदाचिदन्यथा
तेन सुन्दर! भवन्तमाश्रये॥ १२१ ॥

त्वामामनन्ति कवयः करुणामृताब्धिं
त्वामेव संश्रितजनिघ्नं उपघ्नमेषाम्।
एषां व्रजन्निह हि लोचनगोचरस्त्वं
हे सुन्दराह्व! परिचस्करिषे वनाद्रिम्॥ १२२ ॥

अशक्यं नो किञ्चित् तव न च न जानासि निखिलं
दयालुः क्षन्ता चास्यहमपि च नागांसि तरितुम्।
क्षमोऽतस्त्वच्छेषो ह्यगतिरिति च क्षुद्र इति च
क्षमस्वैतावन्नो बलमिह हरे! सुन्दरभुज!॥ १२३ ॥

लङ्कायुद्धहतान् हरीन् द्विजसुतं शम्बूकदोषान्मृतं
सान्दीपन्यभिजं मृतं द्विजसुतान् बालांश्च वैकुण्ठगान्।

गर्भं चार्जुनिसम्भवं व्युदधरः स्वेनैव रूपेण यः
स्वाभीष्टं मम मद्गुरोश्च ददसे नो किं वनाद्रीश्वर!॥ १२४ ॥

आयोध्यगान् सपशुकीटतृणांश्च जन्तून्
किङ्कर्मणो नु बत कीदृशवेदनाढ्यान्।
सायुज्यलभ्यविभवान् निजनित्यलोकान्
सान्तानिकान् अगमयो वनशैलनाथ!॥ १२५ ॥

हरितवारणभृत्यसमाह्वयं
करिगिरौ वरदस्त्वमपूर्विकाम्।
दृशमलम्भय एव हि सुन्दर
स्फुटमदाश्च परश्शतमीदृशम्॥ १२६ ॥

इह च देव! ददासि परान् वरान्
वरद! सुन्दर! सुन्दरदोर्धर।
वनगिरेरभितस्तटमावसन्
निखिललोचनगोचरवैभवः॥ १२७ ॥

इदमिमे शृणुमो मलयध्वजं
नृपमिह स्वयमेव हि सुन्दर।
चरणसात् कृतवानिति तद् वयं
वनगिरीश्वर! जातमनोरथाः॥ १२८ ॥

विज्ञापनां वनगिरीश्वर! सत्यरूपां
अङ्गीकुरुष्व करुणार्णव! मामकीनाम्।
श्रीरङ्गधामनि यथापुरमेष सोऽहं
रामानुजार्यवशगः परिवर्तिषीय॥ १२९ ॥

किञ्चेदं च विरिञ्चभावन! वनाद्रीश! प्रभो! सुन्दर!
प्रत्याख्यानपराङ्मुखो वरदतां पश्यन् अवश्यं कुरु।
श्रीरङ्गश्रियमन्वहं प्रगुणयन् त्वद्भक्तभोग्यां कुरु
प्रत्यक्षं सुनिरस्तमेव विदधत् प्रत्यर्थिनां प्रार्थनाम्॥ १३० ॥

कारुण्यामृतवारिधे! वृषपते हे! सत्यसङ्कल्पन!
श्रीमन्! सुन्दर! योग्यताविरहितान् उत्सार्य सद्वत्सल!।
क्षाम्यन् साधुजनैः कृतांस्तु निखिलानेवापचारान् क्षणात्
तद्भोग्यामनिशं कुरुष्व भगवन्! श्रीरङ्गधामश्रियम्॥ १३१॥

इदं भूयो भूयः पुनरपि च भूयः पुनरपि
स्फुटं विज्ञीप्स्यामित्यगतिरबुधोऽनन्यशरणः।
कृतागा दुष्टात्मा कलुषमतिरस्मीत्यनवधेः
दयायास्ते पात्रं वनगिरिपते! सुन्दरभुज॥ १३२॥

॥ इति श्रीसुन्दरबाहुस्तवः समाप्तः॥

श्रीः

# ॥ श्रीवरदराजस्तवः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळ सूत्रताम्॥

स्वस्ति हस्तिगिरिमस्तशेखरः सन्तनोतु मयि सन्ततं हरिः।
निस्समाभ्यधिकमभ्यधत्त यं देवमौपनिषदी सरस्वती॥ १ ॥

श्रीनिधिं निधिमपारमर्थिनां अर्थितार्थपरिदानदीक्षितम्।
सर्वभूतसुहृदं दयानिधिं देवराजमधिराजमाश्रये॥ २ ॥

नित्यमिन्द्रियपथातिगं महो योगिनामपि सुदूरगं धियः।
अप्यनुश्रवशिरस्सु दुर्ग्रहं प्रादुरस्ति करिशैलमस्तके॥ ३ ॥

वल्लिका श्रुतिमतमल्लिकामयी येन पल्लवितविश्वशाखया।
स्वश्रिया करिगिरेरनुक्रियां वष्टि मृष्टवरदं तमाश्रये॥ ४ ॥

यं परोक्षमुपदेशतस्त्रयी नेति नेति परपर्युदासतः।
वक्ति यस्तं अपरोक्षमीक्षयत्येष तं करिगिरिं समाश्रये॥ ५ ॥

एष ईश इति निर्णयं त्रयी भागधेयरहितेषु नो दिशेत्।
हस्तिधामनि न निर्णयेत को देवराजमयमीश्वरस्त्विति॥ ६ ॥

हे! कुदृष्ट्यभिनिविष्टचेतसां निर्विशेषसविशेषताश्रयम्।
संशयं करिगिरिर्नुदत्यसौ तुङ्गमङ्गळगुणास्पदे हरौ॥ ७ ॥

न्यायतर्कमुनिमुख्यभाषितैः शोधितैः सह कथञ्चन त्रयी।
जोषयेद्हरिमनंहसो जनान् हस्तिधाम सकलं जनं स्वयम्॥ ८ ॥

अद्भुतं महदसीमभूमकं विञ्चिदस्ति किल वस्तु निस्तुलम्।
इत्यघोषि यदिदं तदग्रतः तथ्यमेव करिधाम्नि दृश्यते॥ ९ ॥

संवदेत किल यत् प्रमान्तरैः तत् प्रमाणमिति ये हि मेनिरे।
तन्मतेऽपि बत मानतां गता हस्तिनाऽद्य परवस्तुनि त्रयी॥ १० ॥

गुणायत्तं लोके गुणिषु हि मतं मङ्गळपदं
विपर्यस्तं हस्तिक्षितिधरपते! तत् त्वयि पुनः।
गुणाः सत्यज्ञानप्रभृतय उत त्वद्गततया
शुभीभूयं याता इति हि निरणैष्म श्रुतिवशात्॥ ११॥

निराबाधं नित्यं निरवधि निरंहो निरुपमं
सदा शान्तं शुद्धं प्रतिभटमवद्यस्य सततम्।
परं ब्रह्माम्नातं श्रुतिशिरसि यत् तद् वरद! ते
परं रूपं साक्षात् तदिदमपदं वाङ्मनसयोः॥ १२॥

प्रशान्तानन्तात्मानुभवजमहानन्दमहिम-
प्रसक्तस्तैमित्यानुकृतवितरङ्गार्णवदशम्।
परं यत् ते रूपं स्वसदृशदरिद्रं वरद! तत्
त्रयी पिस्प्रक्षन्ती परनिरसने श्राम्यति परम्॥ १३॥

न वक्तुं न श्रोतुं न मनितुमथोपासिसिषितुं
न च द्रष्टुं स्प्रष्टुं तदनु न च भोक्तुं हि सुशकम्।
परं यद् वस्तूक्तं ननु वरद! साक्षात् तदसि भोः
कथं विश्वस्मै त्वं करिगिरिपुरस्तिष्ठस इह॥ १४॥

प्रकृष्टं विज्ञानं बलमतुलं ऐश्वर्यमखिलं
विमर्यादं वीर्यं वरद! परमा शक्तिरपि च।
परं तेजश्चेति प्रवरगुणषट्कं प्रथमजं
गुणानां निस्सीम्नां गणनविगुणानां प्रसवभूः॥ १५॥

गुणैः षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ
ततस्तिस्रस्तेषां त्रियुग युगलैर्हि त्रिभिरभुः।
व्यवस्था या चैषा ननु वरद! साऽऽविष्कृतिवशात्
भवान् सर्वत्रैव त्वगणितमहामङ्गळगुणः॥ १६॥

इयं वैयूही वै स्थितिरथ किलेच्छाविहृतये
विभूतीनां मध्ये सुरनरतिरश्चामवतरन्।

सजातीयस्तेषामिति तु विभवाख्यामपि भजन्
करीश ! त्वं पूर्णो वरगुणगुणैस्तान् स्थगयसि॥ १७॥

परो या व्यूहो वा विहव उत वाऽर्चवितरणः
भवन् वाऽन्तर्यामी वरवरद ! यो यो भवसि वै।
स स त्वं सन् ऐशान् वरगुणगणान् बिभ्रदखिलान्
भजद्भ्यो भास्येवं सततं इतरेभ्यस्त्वितरथा॥ १८॥

दयाक्षान्त्यौदार्यम्रदिमसमतासौहृदधृति-
प्रसादप्रेमाज्ञाऽऽश्रितसुलभताद्या वरगुणाः।
तथा सौन्दर्याद्यास्तव वरदराजोत्तमगुणाः
विसीमानोऽसङ्ख्याः प्रणतजनभोगं प्रसुवते॥ १९॥

अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः
पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे !।
उपालम्भोऽयं भोः ! श्रयति बत सार्वज्ञ्यमपि ते
यतो दोषं भक्तेष्विह वरद ! नैवाकलयसि !॥ २०॥

पाणिपादवदनेक्षणशब्दैः
अम्बुजान्यपदिशन् वरद ! त्वम्।
बाहुभिस्त्वतिविशालतमालान्
आञ्जनं करिगिरेरसि शृङ्गम्॥ २१॥

त्वामुदारभुजं उन्नसमायत्कर्णपाशपरिकर्मसदंसम्।
आयाताक्षमभिजातकपोलं पारणीयति वरप्रद ! दृङ्मे॥ २२॥

नीलमेघनिभं अञ्जनपुञ्जश्यामकुन्तलं अनन्तशयं त्वाम्।
अब्जपाणिपदं अम्बुजनेत्रं नेत्रसात् कुरु करीश ! सदा मे॥ २३॥

त्वक् च दृक् च निपिपासति जिह्वा
विह्वला श्रवणवत् परवृत्तौ।
नासिका त्वयि करीश ! तथेति
प्राप्नुयां कथमिमां स्विदवस्थाम्॥ २४॥

आधिराज्यमधिकं भुवनानां
  ईश ! ते पिशुनयन् किल मौलिः।
चूलिकामणिसहस्रमरीचेः
  हस्तिभूषण ! भवत्युदयाद्रिः॥ २५॥

उद्धरत्युपरि भक्तजनानित्यूर्ध्वताश्रयणसूचितशक्तिम्।
ऊर्ध्वपुण्ड्रतिलकं बहुमानात् किं बिभर्षि वरद ! स्वललाटे॥ २६॥

कर्णिका तव करीश ! किमेषा
  कर्णभूषणं उतासंविभूषा।
अंसलम्ब्यलकभूषणमाहो !
  मानसस्य मम वा परिकर्म॥ २७॥

पारिजातविटपान् अभितो या
  पुष्पसम्पदुदियात् करिनाथ !।
तां विडम्बयति तावकबाहुषु
  आतता तु कटकाङ्गदलक्ष्मीः॥ २८॥

मथ्यमानचलफेनिलसिन्धु-
  प्रोदितक्षणदशां गमितौ ते।
वक्षसि स्फुरितमौक्तिकहारे
  कौस्तुभश्च कमला च करीश !॥ २९॥

अञ्जनक्षितिभृतो यदि नाम
  उपत्यका वरद ! हेममयी स्यात्।
तादृशी तव विभाति तु लक्ष्मीः
  आम्बरी बत विडम्बितविद्युत्॥ ३०॥

परभागमियाद् रवेस्तमिस्रा
  वरदाद्य त्वयि तन्निशामयामः।
गमिता तव वक्त्रचित्रभानोः
  परभागं ननु कौन्तली तमिस्रा॥ ३१॥

उभयोरपि पक्षयोस्तिथिर्या
विषमीभावनिरासदाऽष्टमीति।
उपमानजसम्पदे हि सेन्दोः
वरदाभूद् भवतो ललाटलक्ष्म्या॥ ३२ ॥

अलकालिचिकीर्षया किलात्ता
सुपरीचिक्षिषया ललाटपट्टे।
सुमषी निकषीकृता भ्रुवौ ते
वरद! स्यादकृतत्वतस्तु नैवम्॥ ३३ ॥

श्रवसश्च दृशश्च शब्दरूप ग्रहणे ते न हि जीववद् व्यवस्था।
उभयोरखिलेक्षणक्षमत्वाद् वरदातः! श्रवणाश्रये दृशौ ते॥ ३४ ॥

करुणारसवाहिवीक्षणोर्मेः वरद! प्रेममयप्रवाहभाजः।
ततितीरवनावली भ्रुवौ दृक्चलसिन्धोस्तव नासिकेव सेतुः॥ ३५ ॥

विभवं विवृणोति विस्तृणीते
रुचं आविष्कुरुते कृपामपाराम्।
अभिवर्षति हर्षं आर्द्रभावं
तनुते ते वरदैष दृष्टिपातः॥ ३६ ॥

अरुणाधरपल्लवे लसन्ती
वरदासौ द्विजचन्द्रचन्द्रिका ते।
अतिविद्रुमं अस्तनिस्तिलाली
रुचमाविष्कुरुते हि पुष्कराक्ष!॥ ३७ ॥

स्मितनिर्झरिका विनिष्पतन्ती
तव वक्षस्स्थलभूतले विशीर्णा।
वरद! प्रबिभर्ति हारलक्ष्मीं
अपि मुक्तावलिका नदीव तज्जा॥ ३८ ॥

परिमण्डितरासमण्डलाभिः वरदाघ्रातं अभीष्टगोपिकाभिः।
अनुवर्तितदातनप्रहर्षाद् इव फुल्लं हि कपोलयोर्युगं ते॥ ३९ ॥

मुखमुन्नसं आयताक्षं उद्यत्स्मितदन्तं रुचिराधरं नतभ्रु।
लसदंसविलम्बिकर्णपाशं मयि ते निश्चलमस्तु हस्तिनाथ!॥ ४०॥

पद्मायाः प्रणयरसात् समासजन्त्याः
स्वं बाहुं सुबहुमतो भुजेन तेन।
कां नामान्वभवदहो! दशां तदात्वे
कण्ठस्ते करिगिरिनाथ! कम्बुकान्तः॥ ४१॥

सायामा धृतपरिणद्धयोऽब्धयो वा
तादृश्यः स्फुटमथ वा दिशश्चतस्रः।
चत्वारो वरद! वरप्रदास्त्वदीयाः
भासन्ते भुजपरिघास्तमालनीलाः॥ ४२॥

आश्लेषे वरद! भुजास्तवेन्दिरायाः
गोपीनामभिमतरासबन्धने वा।
बन्धे वा मुदमधिकां यशोदयाऽऽहो!
सम्प्राप्तास्तव नवनीतमोषदोषात्॥ ४३॥

सालीया इव विटपाः सपल्लवाग्राः
कल्लोला इव जलधेः सविद्रुमाग्राः।
भोगीन्द्रा इव च फणामणीद्धवक्त्राः
भासन्ते वरद! भुजास्तवारुणाग्राः॥ ४४॥

अम्भोधेः स्वयमभिमन्थनं चकर्थ
क्षोणीध्रं पुनरबिभ्रश्च सप्तरात्रम्।
सप्तानां विवलयति स्म कण्ठमुक्ष्णां
अम्लाना वरद! तथाऽपि पाणयस्ते॥ ४५॥

रिङ्खातो व्रजसदनाङ्गणेषु किं ते
गोयष्टिग्रहणवशान्नु गोपगोष्ठ्याम्।
आलम्बाद् हयनयसूत्रतोत्त्रयोर्वा
पाणीनां वरद! तवारुणत्वमासीत्॥ ४६॥

सर्वज्ञाः समुचितशक्तयः सदैव
त्वत्सेवानियमजुषस्त्वदेकभोगाः।
हेतीनामधिपतयः सदा किमेतान्
शोभार्थं वरद! बिभर्षि हर्षतो वा॥ ४७ ॥

किं धातुर्गगनविधानमातृकाऽभूत्
वक्षस्ते वरद! वरेण्य! यत्र नाम।
पद्मायाः मुखमथ कौस्तुभश्च जातौ
चन्द्रार्कावुडुनिकरायते तु हारः॥ ४८ ॥

अण्डानां त्वदुदरमामनन्ति सन्तः
स्थानं तद् वरद! कथं नु कार्श्यमस्य।
माहात्म्यं स्वत इह येषु नूनमेषां
ऋद्धिः स्यान्महिमकरी न हीतरेषाम्॥ ४९ ॥

सौन्दर्यामृतरसवाहवेगजः स्यात्
आवर्तस्तव किल पद्मनाभ! नाभिः।
तत्पद्मं वरद! विभाति कान्तिमय्याः
लक्ष्म्यास्ते सकलवपुर्जुषो नु सद्म॥ ५० ॥

या दामोदर इति नामदा तवासीत्
सा दामा किल किणकारणी बभूव।
तन्नूनं वरद! वलित्रयच्छलेन
त्वन्मध्यप्रथमविभूषणी बभूव॥ ५१ ॥

यादृग्बीजाध्युषितभुवि यद् वस्तु हस्तीश! जातं
तत् तादृक्षं फलति हि फलं त्वय्यपीक्षामहे तत्।
यस्मादण्डाध्युषित उदरे तावके जायमानं
पद्मं पद्मानन! किल फलत्यण्डषण्डानखण्डान्॥ ५२ ॥

अज्ञे यज्ञेश्वर! किल जने क्वाप्यदर्शं विमर्शं
विश्वाधीशः कतम इति तन्निर्णयं वर्णयामः।

व्यावक्रोशी नृषु समुदिता यानुपाश्रित्य तेऽपि
ब्रह्माद्यास्ते वरद! जनितास्तुन्दकन्दारविन्दे॥ ५३॥

मुष्णन् कृष्णः प्रयनिजजनैः जय्यहैयङ्गवीनं
दाम्ना भूम्ना वरद! हि यया त्वं यशोदाकराभ्याम्।
बद्धो बन्धक्षपणकरणीं तां किलाद्यापि मातुः
प्रेम्णा गात्राभरणं उदराबन्धनाख्यं बिभर्षि॥ ५४॥

सौन्दर्याख्या सरिदुरसि विस्तीर्य मध्यावरुद्धा
स्थानाल्पत्वाद् विषमगतिजावर्तगर्ताभनाभिः।
प्राप्य प्राप्तप्रथिम जघनं विस्तृता हस्तिनाथ!
स्रोतोभेदं भजति भवतः पाददेशापदेशात्॥ ५५॥

रम्भास्तम्भाः करिवरकराः कारभाः सारभाजः
वेषाश्लेषा अपि मरकतस्तम्भमुख्यास्तुलाख्याः।
साम्यं सम्यग् वरद! न दधुः सर्वमुर्वोस्त्वदूर्वोः
न ह्यैश्वर्यं दधति न तथा यौवनारम्भजृम्भाः॥ ५६॥

या ते गात्रे वरद! जनिता कान्तिमय्यापगाऽभूत्
तस्याः स्रोतोद्वितयमिह यद् याति पादप्रवादम्।
तज्जातोर्ध्वभ्रमियुगमिवोद्भानुनी जानुनी ते
स्यादुक्ष्णोर्वा ककुदयुगळं यौवनैश्वर्यनाम्नोः॥ ५७॥

प्रेम्णाऽऽघ्रातुं करिगिरिशिरोऽधोमुखीभावभाजोः
अङ्घ्रिद्वन्द्वाह्वयकमलयोः दण्डकाण्डायमाने।
अद्रिस्पर्शोद्भवसुखत उत्कण्टके रोमहर्षात्
द्रष्टुर्दृष्टिर्वरद! किमलं लङ्घितुं जङ्घिके ते॥ ५८॥

भक्तानां यद् वपुषि दहरं पण्डितं पुण्डरीकं
यच्चाम्लानं वरद! सतताध्यासनादासनाब्जम्।
आम्नायानां यदपि च शिरो यश्च मूर्धा शठारेः
हस्त्यद्रेर्वा किमतिसुखदं तेषु पादाब्जयोस्ते॥ ५९॥

पद्मास्वद्माङ्गुलिषु वरद! प्रान्ततः कान्तिसिन्धोः
वीचीवीथीविभवमुभयीष्वम्भसो लम्भितासु।
विन्दन्निन्दुः प्रतिफलनजां सम्पदं किं पदं ते
छायाच्छाद्मा नखविततितां लम्भितः शुम्भितः सन्॥ ६० ॥

शम्भोरम्भोरुहमुख! सखा सन् सहाङ्कः शशाङ्कः
कुर्वन् सेवां वरद! विकलो वृत्तहीनः सुवक्रः।
त्वत्पादाब्जे प्रियमुख! नखच्छद्मनाऽऽश्रित्य नित्यं
सद्वृत्तोऽभूत् स तु दशगुणः पुष्कलो निष्कलङ्कः॥ ६१ ॥

त्वत्पादाब्जे प्रजाता सुरसरिदभवत् प्राक् चतुर्धा ततस्तासु
एकां धत्ते ध्रुवः सा त्रिभुवनमपुनात् त्रीन् पथो भावयन्ती।
तत्रैका खं व्रजन्ती शिवयति तु शिवं सा पुनः सत्पथाऽभूत्
तास्वेका गां पुनाना वरद! सगरजस्वर्गसर्गं चकार॥ ६२ ॥

परिजनपरिबर्हा भूषणान्यायुधानि
प्रवरगुणगणाश्च ज्ञानशक्त्यादयस्ते।
परमपदं अथाण्डान्यात्मदेहस्तथाऽऽत्मा
वरद! सकलमेतत् संश्रितार्थं चकर्थ॥ ६३ ॥

अनाप्तं ह्याप्तव्यं न तव किल किञ्चिद् वरद! ते
जगज्जन्मस्थेमप्रलयविधयो धीविलसितम्।
तथाऽपि क्षोदीयस्सुरनरकुलेष्वाश्रितजनान्
समाश्लेष्टुं पेष्टुं तदसुखकृतां चावतरसि॥ ६४ ॥

विवेकधियमेकतो ह्यभिनिवेशलेशो हरेत्
महत् त्वभिनिवेशनं किमुत तन्महिम्नस्तव।
अहो! विसदृशे जगत्यवततर्थ पार्थादिकं
निजं जनमुदञ्चयन् वरद! तं समाश्लेषकः॥ ६५ ॥

संश्लेषे भजतां त्वरापरवशः कालेन संशोध्य तान्
आनीय स्वपदे स्वसङ्गमकृतं सोढुं विलम्बं बत।

अक्षाम्यन् क्ष्मिणां वरो वरद ! सन् अत्रावतीर्णो भवेः
किं नाम त्वमसंश्रितेषु वितरन् वेषं वृणीषे तु तान्॥ ६६ ॥

वरद ! यदि न भुव्यवातरिष्यः
श्रुतिविहिताः त्वदुपासनार्चनाद्याः।
करणपथविदूरगे सति त्वयि
अविषयतानिकृताः किलाभविष्यन्॥ ६७ ॥

यदपराधसहस्रं अजस्रजं
त्वयि शरण्य ! हिरण्य उपावहत्।
वरद ! तेन चिरं त्वमविक्रियः
विकृतिमर्भकनिर्भजनादगाः॥ ६८ ॥

त्वामामनन्ति कवयः करुणामृताब्धे !
ज्ञानक्रियाभजनलभ्यं अलभ्यमन्यैः।
एतेषु केन वरदोत्तरकोसलस्थाः
पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वाम्॥ ६९ ॥

भवत्सु वात्सल्यवशात् समुत्सुकः
प्रकाममत्रावतरेर्वरप्रद !।
भवेश्च तेषां सुलभोऽथ किं न्विदं
यदङ्ग दाम्ना नियतः पुराऽरुदः !॥ ७० ॥

नरसिंहतनुरगौणी समसमयसमुद्भवश्च भक्तगिरः।
स्तम्भे च सम्भवस्ते पिशुनयति परेशतां वरद !॥ ७१ ॥

तापत्रयीमयदवानलदह्यमानं
मुह्यन्तमन्तमवयन्तं अनन्त ! नैव।
स्थातुं प्रयातुमुपयातुं अनीशं ईश !
हस्तीश ! दृष्ट्यमृतवृष्टिभिराभजेथाः॥ ७२ ॥

नानाविरुद्धविदिशासु दशासु चाहो
वन्ध्यैर्मनोरथशतैर्युगपद् विकृष्टः।

त्वत्पादयोरनुदितस्पृह एष सोऽहं
न स्वस्ति हस्तिगिरिनाथ! निशामयामि॥ ७३॥

है! निर्भयोऽस्म्यविनयोऽस्मि यतस्त्वदङ्घ्रौ
लिप्सामलब्धवति चेतसि दुर्विनीते।
दुष्कर्मवर्मपरिकर्मित एष सोऽहं
अग्रे वरप्रद! तव प्रलपामि किञ्चित्॥ ७४॥

स व्याधिराधिरवितुष्टिरनिष्टयोगः
स्वाभीष्टभञ्जनं अमर्षकरो निकर्षः।
कृन्तन्ति सन्ततमिमानि मनो मदीयं
हस्तीश! न त्वदभिलाषनिधिप्रहाणिः॥ ७५॥

विद्वेषमानमदरागविलोभमोहा-
द्याजानभूमिरहमत्र भवे निमज्जन्।
निर्द्वन्द्व नित्य निरवद्य महागुणं त्वां
हस्तीश! कः श्रयितुमीक्षितुमीप्सितुं वा॥ ७६॥

पुत्रादयः कथममी मयि संस्थिते स्युः
इत्यप्रतिक्रियनिरर्थकचिन्तनेन।
दूये न तु स्वयमहं भवितास्मि कीदृग्
इत्यस्ति हस्तिगिरिनाथ! विमर्शलेशः॥ ७७॥

शम्पाचलं बहुलदुःखं अनर्थहेतुः
अल्पीय इत्यपि विमृष्टिषु दृष्टदोषम्।
दुर्वासनाद्रढिमतः सुखमिन्द्रयोत्थं
हातुं न मे मतिरलं वरदाधिराज!॥ ७८॥

बुद्ध्वा च नो च विहिताकरणैर्निषिद्ध-
संसेवनैस्त्वदपचारशतैरसह्यैः।
भक्तागसामपि शतैर्भवताऽप्यगण्यैः
हस्तीश! वाक्तनुमनोजनितैर्हतोऽस्मि॥ ७९॥

त्वद्दास्यमस्य हि मम स्वरसप्रसक्तं
तच्चोरयन् अयमहं किल चस्खल प्राक्।
त्वं मामकीन इति मामभिमन्यसे स्म
हस्तीश! संशयथ नस्तमिमं विवादम्॥ ८०॥

भोगा इमे विधिशिवादिपदं च किञ्च
स्वात्मानुभूतिरिति या किल मुक्तिरुक्ता।
सर्वं तदूषजलजोषमहं जुषेय
हस्त्यद्रिनाथ! तव दास्यमहारसज्ञः॥ ८१॥

विषयविषधरव्रजव्याकुले
जननमरणनक्रचक्रास्पदे।
अगतिरशरणो भावाब्धौ लुठन्
वरद! शरणमित्यहं त्वां वृणे॥ ८२॥

अकृतसुकृतकः सुदुष्कृत्तरः
शुभगुणलवलेशदेशातिगः।
अशुभगुणपरस्सहस्रावृतो
वरदमुरुदयं गतिं त्वां वृणे॥ ८३॥

शरणवरणवागियं योदिता
न भवति बत साऽपि धीपूर्विका।
इति यदि दयनीयता मय्यहो!
वरद! तव भवेत् ततः प्राणिमि॥ ८४॥

निरवधिषु कृतेषु चागस्स्वहो!
मतिरनुशयिनी यदि स्यात् ततः।
वरद! हि दयसे न संशेमहे
निरनुशयधियो हता है वयम्॥ ८५॥

शरणवरणवागियं याऽद्य मे
वरद! तदधिकं न किञ्चिन्मम।

सुलभमभिमतार्थदं साधनं
तदयमवसरो दयायास्तव॥ ८६ ॥

विषयविषयिणी स्पृहा भूयसी
तव तु चरणयोर्न साऽल्पापि मे।
वरद! ननु भरस्तवैव त्वयं
यदुत तव पदस्पृहाजन्म मे॥ ८७ ॥

इयमिह मतिरस्मदुज्जीवनो
वरद! तव खलु प्रसादादृते।
शरणमिति वचोऽपि मे नोदियात्
त्वमसि मयि ततः प्रसादोन्मुखः॥ ८८ ॥

वरद! यदिह वस्तु वाञ्छाम्यहं
तव चरणलभाविरोधस्ततः।
यदि न भवति तत् प्रदेहि प्रभो!
झटिति वितर पादमेवान्यथा॥ ८९ ॥

तदपि किमपि हन्त! दुर्वासना-
शतविवशतया यदभ्यर्थये।
तदतुलदय! सार्व! सर्वप्रद!
प्रवितर वरद! क्षमाम्भोनिधे!॥ ९० ॥

प्रियमितरदथापि वा यद् यथा
वितरसि वरद! प्रभो! त्वं हि मे।
तदनुभवनमेव युक्तं तु मे
त्वयि निहितभरोऽस्मि सोऽहं यतः॥ ९१ ॥

यथाऽसि यावानसि योऽसि यद्गुणः
करीश! यादृग्विभवो यदिङ्गितः।
तथाविधं त्वाऽहमभक्तदुर्ग्रहं
प्रपत्तिवाचैव निरीक्षितुं वृणे॥ ९२ ॥

अये! दयालो! वरद! क्षमानिधे!
विशेषतो विश्वजनीन! विश्वद!।
हितज्ञ! सर्वज्ञ! समग्रशक्तिक!
प्रसह्य मां प्रापय दास्यमेव ते॥ ९३॥

स्वकैर्गुणैः स्वैश्चरितैः स्ववेदनात्
भजन्ति ये त्वां त्वयि भक्तितोऽथवा।
करीश! तेषामपि तावकी दया
तथात्वकृत् सैव तु मे बलं मतम्॥ ९४॥

यदि त्वभक्तोऽप्यगुणोऽपि निष्क्रियः
निरुद्यमो निष्कृतदुष्कृतो न च।
लभेय पादौ वरद! स्फुटास्ततः
क्षमादयाद्यास्तव मङ्गला गुणाः॥ ९५॥

विलोकनैर्विभ्रमणैरपि भ्रुवोः
स्मितामृतैरिङ्गितमङ्गलैरपि।
प्रचोदितस्ते वरद! प्रहृष्टधीः
कदा विधास्ये वरिवस्यनं तव॥ ९६॥

विविश्य विश्वेन्द्रियतर्षकर्षणीः
मनस्स्थले नित्यनिखातनिश्चलाः।
सुधासखीर्हस्तिपते! सुशीतलाः
गिरः श्रवस्याः शृणुयाम तावकीः॥ ९७॥

अशेषदेशाखिलकालयोगिनीषु
अहं त्ववस्थास्वखिलास्वनन्यधीः।
अशेषदास्यैकरतिस्तदाचरन्
करीश! वर्तेय सदा त्वदन्तिके॥ ९८॥

इमं जनं हन्त! कदाऽभिषेक्ष्यति
त्वदक्षिनद्योर्वरद! श्रमापहा।

अकृत्रिमप्रेमरसप्रवाहजा
  विसृत्वरी वीक्षणवीचिसन्ततिः ॥ ९९ ॥

सदातनत्वेऽपि तदातनत्ववत्
  नवीभवत्प्रेमरसप्रवाहया।
निषेवितं त्वां सततोत्कया श्रिया
  करीश ! पश्येम परश्शतं समाः ॥ १०० ॥

समाहितैः साधु सनन्दनादिभिः
  सुदुर्लभं भक्तजनैरदुर्लभम्।
अचिन्त्यं अत्यद्भुतं अप्रतर्कणं
  वरप्रद ! त्वत्पदमाप्नुयां कथम्॥ १०१ ॥

रामानुजाङ्घ्रिशरणोऽस्मि कुलप्रदीपः
  त्वासीत् स यामुनमुनेः स च नाथवंश्यः।
वंश्यः पराङ्कुशमुनेः स च सोऽपि देव्याः
  दासस्तवेति वरदास्मि तवेक्षणीयः॥ १०२ ॥

॥ इति श्रीवरदराजस्तवः समाप्तः ॥

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीस्तवः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळ सूत्रताम्॥

स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थितीः
स्वर्गं दुर्गतिमापवर्गिकपदं सर्वञ्च कुर्वन् हरिः।
यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं
क्रीडेयं खलु नान्यथाऽस्य रसदा स्यादैकरस्यात्तया॥ १॥

हे श्रीर्देवि समस्त लोकजननीं त्वां स्तोतुमीहामहे
युक्तां भावय भारतीं प्रगुणय प्रेमप्रधानां धियम्।
भक्तिं भन्दय नन्दयाश्रितमिमं दासं जनं तावकं
लक्ष्यं लक्ष्मि कटाक्षवीचिविसृतेः ते स्याम चामी वयम्॥ २॥

स्तोत्रं नाम किमामनन्ति कवयो यद्यन्यदीयान् गुणान्
अन्यत्र त्वसतोऽधिरोप्य फणितिस्सा तर्हि वन्ध्या त्वयि।
सम्यक्सत्यगुणाभिवर्णनमथो ब्रूयुः कथं तादृशी
वाग्वाचस्पतिनाऽपि शक्यरचना त्वत्सद्गुणार्णोनिधौ॥ ३॥

ये वाचां मनसां च दुर्ग्रहतया ख्याता गुणास्तावकाः
तानेव प्रति साम्बुजिह्वमुदिता है मामिका भारती।
हास्यं तत्तु न मन्महे न हि चकोर्यैकाऽखिलां चन्द्रिकां
नालं पातुमिति प्रगृह्य रसनामासीत सत्यां तृषि॥ ४॥

क्षोदीयानपि दुष्टबुद्धिरपि निःस्नेहोऽप्यनीहोऽपि ते
कीर्तिं देवि लिहन्नहं न च बिभेम्यज्ञो न जिह्रेमि च।
दुष्येत्सा तु न तावता न हि शुना लीढाऽपि भागीरथी
दुष्येच्छ्वापि न लज्जते न च बिभेत्यार्तिस्तु शाम्येच्छुनः॥ ५॥

ऐश्वर्यं महदेव वाऽल्पमथवा दृश्येत पुंसां हि यत्
तल्लक्ष्म्याः समुदीक्षणात्तव यतः सार्वत्रिकं वर्तते।
तेनैतेन न विस्मयेमहि जगन्नाथोऽपि नारायणः
धन्यं मन्यत ईक्षणात्तव यतः स्वात्मानमात्मेश्वरः॥ ६ ॥

ऐश्वर्यं यदशेष पुंसि यदिदं सौन्दर्यलावण्ययोः
रूपं यच्च हि मङ्गळं किमपि यल्लोके सदित्युच्यते।
तत्सर्वं त्वदधीनमेव यदतः श्रीरित्यभेदेन वा
यद्वा श्रीमदितीदृशेन वचसा देवि प्रथामश्नुते॥ ७ ॥

देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते
यद्यप्येवमथापि नैव युवयोः सर्वज्ञता हीयते।
यन्नास्त्येव तदज्ञतामनुगुणां सर्वज्ञताया विदुः
व्योमाम्भोजमिदन्तया किल विदन् भ्रान्तोऽयमित्युच्यते॥ ८ ॥

लोके वनस्पतिबृहस्पतितारतम्यं
यस्याः प्रसादपरिणाममुदाहरन्ति।
सा भारती भगवती तु यदीयदासी
तां देवदेवमहिषीं श्रियमाश्रयामः॥ ९ ॥

यस्याः कटाक्ष मृदुवीक्षण दीक्षणेन
सद्यस्समुल्लसित पल्लवमुल्ललास।
विश्वं विपर्यय समुत्थविपर्ययं प्राक्
तां देवदेवमहिषीं श्रियमाश्रयामः॥ १० ॥

यस्याः कटाक्षवीक्षाक्षणलक्षं लक्षिता महेशास्स्युः।
श्रीरङ्गराजमहिषी सा मामपि वीक्षतां लक्ष्मीः॥ ११ ॥

॥ इति श्रीस्तवः समाप्तः ॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगताः देशिका मुक्तिमापुः।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थाम्
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः॥